Link: www.vedakosh.com/rig-veda/mandal-3/sukta-003/mantra-rig-03-003-002

MANTRA NUMBER:

Mantra 2 of Sukta 3 of Mandal 3 of Rig Veda
Mantra 2 of Varga 20 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 40 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- वैश्वानरोऽग्निः

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒न्तर्दू॒तो रोद॑सी द॒स्म ईय॑ते॒ होता॒ निष॑त्तो॒ मनु॑षः पु॒रोहि॑तः । क्षयं॑ बृ॒हन्तं॒ परि॑ भूषति॒ द्युभि॑र्दे॒वेभि॑र॒ग्निरि॑षि॒तो धि॒याव॑सुः ॥

The Mantra without meters (Sanskrit)

अन्तर्दूतो रोदसी दस्म ईयते होता निषत्तो मनुषः पुरोहितः । क्षयं बृहन्तं परि भूषति द्युभिर्देवेभिरग्निरिषितो धियावसुः ॥

The Mantra's transliteration in English

antar dūto rodasī dasma īyate hotā niṣatto manuṣaḥ purohitaḥ | kṣayam bṛhantam pari bhūṣati dyubhir devebhir agnir iṣito dhiyāvasuḥ ||

The Pada Paath (Sanskrit)

अ॒न्तः । दू॒तः । रोद॑सी॒ इति॑ । द॒स्मः । ई॒य॒ते॒ । होता॑ । निऽस॑त्तः । मनु॑षः । पु॒रःऽहि॑तः । क्षय॑म् । बृ॒हन्त॑म् । परि॑ । भू॒ष॒ति॒ । द्यु॒ऽभिः॑ । दे॒वेभिः॑ । अ॒ग्निः । इ॒षि॒तः । धि॒याऽव॑सुः ॥

The Pada Paath - transliteration

antaḥ | dūtaḥ | rodasī iti | dasmaḥ | īyate | hotā | ni-sattaḥ | manuṣaḥ | puraḥ-hitaḥ | kṣayam | bṛhantam | pari | bhūṣati | dyu-bhiḥ | devebhiḥ | agniḥ | iṣitaḥ | dhiyāvasuḥ

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-003/mantra-rig-03-003-003

MANTRA NUMBER:

Mantra 3 of Sukta 3 of Mandal 3 of Rig Veda
Mantra 3 of Varga 20 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 41 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- वैश्वानरोऽग्निः

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

केतुं यज्ञानां विदथस्य साधनं विप्रासो अग्निं महयन्त चित्तिभिः । अपांसि यस्मिन्नधि संदधुर्गिरस्तस्मिन्त्सुम्नानि यजमान आ चके ॥

The Mantra without meters (Sanskrit)

केतुं यज्ञानां विदथस्य साधनं विप्रासो अग्निं महयन्त चित्तिभिः । अपांसि यस्मिन्नधि संदधुर्गिरस्तस्मिन्त्सुम्नानि यजमान आ चके ॥

The Mantra's transliteration in English

ketuṁ yajñānāṁ vidathasya sādhanaṁ viprāso agnim mahayanta cittibhiḥ | apāṁsi yasminn adhi saṁdadhur giras tasmin sumnāni yajamāna ā cake ||

The Pada Paath (Sanskrit)

केतुम् । यज्ञानाम् । विदथस्य । साधनम् । विप्रासः । अग्निम् । महयन्त । चित्तिऽभिः । अपांसि । यस्मिन् । अधि । सम्ऽदधुः । गिरः । तस्मिन् । सुम्नानि । यजमानः । आ । चके ॥

The Pada Paath - transliteration

ketum | yajñānām | vidathasya | sādhanam | viprāsaḥ | agnim | mahayanta | citti-bhiḥ | apāṃsi | yasmin | adhi | sam-dadhuḥ | giraḥ | tasmin | sumnāni | yajamānaḥ | ā | cake

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-003/mantra-rig-03-003-004

MANTRA NUMBER:

Mantra 4 of Sukta 3 of Mandal 3 of Rig Veda
Mantra 4 of Varga 20 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 42 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- वैश्वानरोऽग्निः

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

पि॒ता य॒ज्ञाना॒मसु॑रो विप॒श्चितां॑ वि॒मान॑म॒ग्निर्व॒युनं॑ च वा॒घता॑म् । आ वि॑वेश॒ रोद॑सी॒ भूरि॑वर्पसा पुरुप्रि॒यो भ॑न्दते॒ धाम॑भिः क॒विः ॥

The Mantra without meters (Sanskrit)

पिता यज्ञानामसुरो विपश्चितां विमानमग्निर्वयुनं च वाघताम् । आ विवेश रोदसी भूरिवर्पसा पुरुप्रियो भन्दते धामभिः कविः ॥

The Mantra's transliteration in English

pitā yajñānām asuro vipaścitāṁ vimānam agnir vayunaṁ ca vāghatām | ā viveśa rodasī bhūrivarpasā purupriyo bhandate dhāmabhiḥ kaviḥ ||

The Pada Paath (Sanskrit)

पि॒ता । य॒ज्ञाना॑म् । असु॑रः । वि॒पः॒ऽचिता॑म् । वि॒ऽमान॑म् । अ॒ग्निः । व॒युन॑म् । च॒ । वा॒घता॑म् । आ । वि॒वे॒श॒ । रोद॑सी॒ इति॑ । भूरि॑ऽवर्पसा । पु॒रु॒ऽप्रि॒यः । भ॒न्द॒ते॒ । धाम॑ऽभिः । क॒विः ॥

The Pada Paath - transliteration

pitā | yajñānām | asuraḥ | vipaḥ-citām | vi-mānam | agniḥ | vayunam | ca | vāghatām | ā | viveśa | rodasī iti | bhūri-varpasā | puru-priyaḥ | bhandate | dhāma-bhiḥ | kaviḥ

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-003/mantra-rig-03-003-005

MANTRA NUMBER:

Mantra 5 of Sukta 3 of Mandal 3 of Rig Veda
Mantra 5 of Varga 20 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 43 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- वैश्वानरोऽग्निः

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

चन्द्रमग्निं चन्द्ररथं हरिव्रतं वैश्वानरमप्सुषदं स्वर्विदम् । विगाहं तूर्णिं तविषीभिरावृतं भूर्णिं देवास इह सुश्रियं दधुः ॥

The Mantra without meters (Sanskrit)

चन्द्रमग्निं चन्द्ररथं हरिव्रतं वैश्वानरमप्सुषदं स्वर्विदम् । विगाहं तूर्णिं तविषीभिरावृतं भूर्णिं देवास इह सुश्रियं दधुः ॥

The Mantra's transliteration in English

candram agniṁ candrarathaṁ harivrataṁ vaiśvānaram apsuṣadaṁ svarvidam | vigāhaṁ tūrṇiṁ taviṣībhir āvṛtam bhūrṇiṁ devāsa iha suśriyaṁ dadhuḥ ||

The Pada Paath (Sanskrit)

चन्द्रम् । अग्निम् । चन्द्रऽरथम् । हरिऽव्रतम् । वैश्वानरम् । अप्सुऽसदम् । स्वःऽविदम् । विऽगाहम् । तूर्णिम् । तविषीभिः । आऽवृतम् । भूर्णिम् । देवासः । इह । सुऽश्रियम् । दधुः ॥

The Pada Paath - transliteration

candram | agnim | candra-ratham | hari-vratam | vaiśvānaram | apsu-sadam | svaḥ-vidam | vi-gāham | tūrṇim | taviṣībhiḥ | āvṛtam | bhūrṇim | devāsaḥ | iha | su-śriyam | dadhuḥ

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-003/mantra-rig-03-003-006

MANTRA NUMBER:

Mantra 6 of Sukta 3 of Mandal 3 of Rig Veda
Mantra 1 of Varga 21 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 44 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- वैश्वानरोऽग्निः

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒ग्निर्दे॒वेभि॒र्मनु॑षश्च ज॒न्तुभि॑स्तन्वा॒नो य॒ज्ञं पु॑रु॒पेश॑सं धि॒या । र॒थीर॒न्तरी॑यते॒ साध॑दिष्टिभिर्जी॒रो दमू॑ना अभिशस्ति॒चात॑नः ॥

The Mantra without meters (Sanskrit)

अग्निर्देवेभिर्मनुषश्च जन्तुभिस्तन्वानो यज्ञं पुरुपेशसं धिया । रथीरन्तरीयते साधदिष्टिभिर्जीरो दमूना अभिशस्तिचातनः ॥

The Mantra's transliteration in English

agnir devebhir manuṣaś ca jantubhis tanvāno yajñam purupeśasaṁ dhiyā | rathīr antar īyate sādhadiṣṭibhir jīro damūnā abhiśasticātanaḥ ||

The Pada Paath (Sanskrit)

अ॒ग्निः । दे॒वेभिः॑ । मनु॑षः । च॒ । ज॒न्तुऽभिः॑ । त॒न्वा॒नः । य॒ज्ञम् । पु॒रु॒ऽपेश॑सम् । धि॒या । र॒थीः । अ॒न्तः । ई॒य॒ते॒ । साध॑दिष्टिऽभिः । जी॒रः । दमू॑नाः । अ॒भि॒श॒स्ति॒ऽचात॑नः ॥

The Pada Paath - transliteration

agniḥ | devebhiḥ | manuṣaḥ | ca | jantu-bhiḥ | tanvānaḥ | yajñam | puru-peśasam | dhiyā | rathīḥ | antaḥ | īyate | sādhadiṣṭi-bhiḥ | jīraḥ | damūnāḥ | abhiśasti-cātanaḥ

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-003/mantra-rig-03-003-007

MANTRA NUMBER:

Mantra 7 of Sukta 3 of Mandal 3 of Rig Veda
Mantra 2 of Varga 21 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 45 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- वैश्वानरोऽग्निः

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

अग्ने॒ जर॑स्व स्वप॒त्य आयु॑न्यू॒र्जा पि॑न्वस्व॒ समिषो॑ दिदीहि नः । वयां॑सि जिन्व बृह॒तश्च॑ जागृव उ॒शिग्दे॒वाना॒मसि॑ सु॒क्रतु॑र्वि॒पाम् ॥

The Mantra without meters (Sanskrit)

अग्ने जरस्व स्वपत्य आयुन्यूर्जा पिन्वस्व समिषो दिदीहि नः । वयांसि जिन्व बृहतश्च जागृव उशिग्देवानामसि सुक्रतुर्विपाम् ॥

The Mantra's transliteration in English

agne jarasva svapatya āyuny ūrjā pinvasva sam iṣo didīhi naḥ | vayāṁsi jinva bṛhataś ca jāgṛva uśig devānām asi sukratur vipām ||

The Pada Paath (Sanskrit)

अग्ने॑ । जर॑स्व । सु॒ऽअ॒प॒त्ये । आयु॑नि । ऊ॒र्जा । पि॒न्व॒स्व॒ । सम् । इषः॑ । दि॒दी॒हि॒ । नः॒ । वयां॑सि । जि॒न्व॒ । बृ॒ह॒तः । च॒ । जा॒गृ॒वे॒ । उ॒शिक् । दे॒वाना॑म् । असि॑ । सु॒ऽक्रतुः॑ । वि॒पाम् ॥

The Pada Paath - transliteration

agne | jarasva | su-apatye | āyuni | ūrjā | pinvasva | sam | iṣaḥ | didīhi | naḥ | vayāṃsi | jinva | bṛhataḥ | ca | jāgṛve | uśik | devānām | asi | su-kratuḥ | vipām

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-003/mantra-rig-03-003-008

MANTRA NUMBER:

Mantra 8 of Sukta 3 of Mandal 3 of Rig Veda
Mantra 3 of Varga 21 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 46 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- वैश्वानरोऽग्निः

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

विशपतिं यह्वमतिथिं नरः सदा यन्तारं धीनामुशिजं च वाघताम् । अध्वराणां चेतनं जातवेदसं प्र शंसन्ति नमसा जूतिभिर्वृधे ॥

The Mantra without meters (Sanskrit)

विश्पतिं यह्वमतिथिं नरः सदा यन्तारं धीनामुशिजं च वाघताम् । अध्वराणां चेतनं जातवेदसं प्र शंसन्ति नमसा जूतिभिर्वृधे ॥

The Mantra's transliteration in English

viśpatiṁ yahvam atithiṁ naraḥ sadā yantāraṁ dhīnām uśijaṁ ca vāghatām | adhvarāṇāṁ cetanaṁ jātavedasam pra śaṁsanti namasā jūtibhir vṛdhe ||

The Pada Paath (Sanskrit)

विश्पतिम् । यह्वम् । अतिथिम् । नरः । सदा । यन्तारम् । धीनाम् । उशिजम् । च । वाघताम् । अध्वराणाम् । चेतनम् । जातऽवेदसम् । प्र । शंसन्ति । नमसा । जूतिऽभिः । वृधे ॥

The Pada Paath - transliteration

viśpatim | yahvam | atithim | naraḥ | sadā | yantāram | dhīnām | uśijam | ca | vāghatām | adhvarāṇām | cetanam | jāta-vedasam | pra | śaṃsanti | namasā | jūti-bhiḥ | vṛdhe

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-003/mantra-rig-03-003-009

MANTRA NUMBER:

Mantra 9 of Sukta 3 of Mandal 3 of Rig Veda
Mantra 4 of Varga 21 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 47 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- वैश्वानरोऽग्निः

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

वि॒भावा॑ दे॒वः सु॒रण॒: परि॑ क्षि॒तीर॒ग्निर्ब॑भूव॒ शव॑सा सु॒मद्र॑थः । तस्य॑ व्र॒तानि॑ भूरिपो॒षिणो॑ व॒यमुप॑ भूषेम॒ दम॒ आ सु॑वृ॒क्तिभि॑: ॥

The Mantra without meters (Sanskrit)

विभावा देवः सुरणः परि क्षितीरग्निर्बभूव शवसा सुमद्रथः । तस्य व्रतानि भूरिपोषिणो वयमुप भूषेम दम आ सुवृक्तिभिः ॥

The Mantra's transliteration in English

vibhāvā devaḥ suraṇaḥ pari kṣitīr agnir babhūva śavasā sumadrathaḥ | tasya vratāni bhūripoṣiṇo vayam upa bhūṣema dama ā suvṛktibhiḥ ||

The Pada Paath (Sanskrit)

वि॒भाऽवा॑ । दे॒वः । सु॒ऽरणः॑ । परि॑ । क्षि॒तीः । अ॒ग्निः । ब॒भू॒व॒ । शव॑सा । सु॒मत्ऽर॑थः । तस्य॑ । व्र॒तानि॑ । भू॒रि॒ऽपो॒षिणः॑ । व॒यम् । उप॑ । भू॒षे॒म॒ । दमे॑ । आ । सु॒वृ॒क्तिऽभिः॑ ॥

The Pada Paath - transliteration

vibhāvā | devaḥ | su-raṇaḥ | pari | kṣitīḥ | agniḥ | babhūva | śavasā | sumat-rathaḥ | tasya | vratāni | bhūri-poṣiṇaḥ | vayam | upa | bhūṣema | dame | ā | suvṛkti-bhiḥ

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-003/mantra-rig-03-003-010

MANTRA NUMBER:

Mantra 10 of Sukta 3 of Mandal 3 of Rig Veda
Mantra 5 of Varga 21 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 48 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- वैश्वानरोऽग्निः

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

वैश्वा॑नर॒ तव॒ धामा॒न्या च॑क्रे॒ येभिः॑ स्व॒र्विद॑भ॑वो विचक्षण । जा॒त आपृ॑णो॒ भु॒व॑नानि॒ रोद॑सी॒ अग्न॒ ता विश्वा॑ परि॒भूर॑सि॒ त्मना॑ ॥

The Mantra without meters (Sanskrit)

वैश्वानर तव धामान्या चके येभिः स्वर्विदभवो विचक्षण । जात आपृणो भुवनानि रोदसी अग्ने ता विश्वा परिभूरसि त्मना ॥

The Mantra's transliteration in English

vaiśvānara tava dhāmāny ā cake yebhiḥ svarvid abhavo vicakṣaṇa | jāta āpṛṇo bhuvanāni rodasī agne tā viśvā paribhūr asi tmanā ||

The Pada Paath (Sanskrit)

वैश्वा॑नर । तव॑ । धामा॑नि । आ । च॒क्रे॒ । येभिः॑ । स्व॒ःऽवित् । अभ॑वः । वि॒ऽच॒क्ष॒ण॒ । जा॒तः । आ । अ॒पृ॒णः॒ । भुव॑नानि । रोद॑सी॒ इति॑ । अग्ने॑ । ता । विश्वा॑ । प॒रि॒ऽभूः । अ॒सि॒ । त्मना॑ ॥

The Pada Paath - transliteration

vaiśvānara | tava | dhāmāni | ā | cakre | yebhiḥ | svaḥ-vit | abhavaḥ | vi-cakṣaṇa | jātaḥ | ā | apṛṇaḥ | bhuvanāni | rodasī iti | agne | tā | viśvā | pari-bhūḥ | asi | tmanā

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-003/mantra-rig-03-003-011

MANTRA NUMBER:

Mantra 11 of Sukta 3 of Mandal 3 of Rig Veda
Mantra 6 of Varga 21 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 49 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- वैश्वानरोऽग्निः

छन्द: (Chhand) :- भुरिक्पङ्क्ति

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

वै॒श्वा॒न॒रस्य॑ दं॒सना॑भ्यो बृ॒हदरि॑णा॒देकः॑ स्वप॒स्यया॑ क॒विः । उ॒भा पि॒तरा॑ म॒हय॑न्नजायता॒ग्निर्द्यावा॑पृथि॒वी भूरि॑रेतसा ॥

The Mantra without meters (Sanskrit)

वैश्वानरस्य दंसनाभ्यो बृहदरिणादेकः स्वपस्यया कविः । उभा पितरा महयन्नजायताग्निर्द्यावापृथिवी भूरिरेतसा ॥

The Mantra's transliteration in English

vaiśvānarasya daṁsanābhyo bṛhad ariṇād ekaḥ svapasyayā kaviḥ | ubhā pitarā mahayann ajāyatāgnir dyāvāpṛthivī bhūriretasā ||

The Pada Paath (Sanskrit)

वै॒श्वा॒न॒रस्य॑ । दं॒सना॑भ्यः । बृ॒हत् । अरि॑णात् । एकः॑ । सु॒ऽअ॒प॒स्यया॑ । क॒विः । उ॒भा । पि॒तरा॑ । म॒हय॑न् । अ॒जा॒य॒त॒ । अ॒ग्निः । द्यावा॑पृथि॒वी इति॑ । भूरि॑ऽरेतसा ॥

The Pada Paath - transliteration

vaiśvānarasya | daṃsanābhyaḥ | bṛhat | ariṇāt | ekaḥ | su-apasyayā | kaviḥ | ubhā | pitarā | mahayan | ajāyata | agniḥ | dyāvāpṛthivī iti | bhūri-retasā

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-004/mantra-rig-03-004-001

MANTRA NUMBER:

Mantra 1 of Sukta 4 of Mandal 3 of Rig Veda
Mantra 1 of Varga 22 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 50 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- आप्रियः

छन्द: (Chhand) :- स्वराट्पङ्क्ति

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

स॒मित्स॑मित्सु॒मना॑ बोध्य॒स्मे शु॒चाशु॑चा सु॒म॒तिं रा॑सि॒ वस्वः॑ । आ दे॑व दे॒वान्य॒जथा॑य वक्षि॒ सखा॒ सखी॑न्त्सु॒मना॑ यक्ष्यग्ने ॥

The Mantra without meters (Sanskrit)

समित्समित्सुमना बोध्यस्मे शुचाशुचा सुमतिं रासि वस्वः । आ देव देवान्यजथाय वक्षि सखा सखीन्त्सुमना यक्ष्यग्ने ॥

The Mantra's transliteration in English

samit-samit sumanā bodhy asme śucā-śucā sumatiṁ rāsi vasvaḥ | ā deva devān yajathāya vakṣi sakhā sakhīn sumanā yakṣy agne ||

The Pada Paath (Sanskrit)

स॒मित्ऽस॑मित् । सु॒ऽमनाः॑ । बो॒धि॒ । अ॒स्मे इति॑ । शु॒चाऽशु॑चा । सु॒ऽम॒तिम् । रा॒सि॒ । वस्वः॑ । आ । दे॒व॒ । दे॒वान् । य॒जथा॑य । व॒क्षि॒ । सखा॑ । सखी॑न् । सु॒ऽमनाः॑ । य॒क्षि॒ । अ॒ग्ने॒ ॥

The Pada Paath - transliteration

samit-samit | su-manāḥ | bodhi | asme iti | śucāśucā | su-matim | rāsi | vasvaḥ | ā | deva | devān | yajathāya | vakṣi | sakhā | sakhīn | su-manāḥ | yakṣi | agne

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-004/mantra-rig-03-004-002

MANTRA NUMBER:

Mantra 2 of Sukta 4 of Mandal 3 of Rig Veda
Mantra 2 of Varga 22 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 51 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- आप्रियः

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

यं दे॒वास॒स्त्रिरह॒न्ना॒यज॑न्ते दि॒वेदि॑वे॒ वरु॑णो मि॒त्रो अ॒ग्निः । सेमं य॒ज्ञं मधु॑मन्तं कृधी न॒स्तनू॑नपाद्घृ॒तयो॑निं वि॒धन्त॑म् ॥

The Mantra without meters (Sanskrit)

यं देवासस्त्रिरहन्नायजन्ते दिवेदिवे वरुणो मित्रो अग्निः । सेमं यज्ञं मधुमन्तं कृधी नस्तनूनपाद्घृतयोनिं विधन्तम् ॥

The Mantra's transliteration in English

yaṁ devāsas trir ahann āyajante dive-dive varuṇo mitro agniḥ | semaṁ yajñam madhumantaṁ kṛdhī nas tanūnapād ghṛtayoniṁ vidhantam ||

The Pada Paath (Sanskrit)

यम् । दे॒वासः॑ । त्रिः । अह॑न् । आ॒ऽयज॑न्ते । दि॒वेऽदि॑वे । वरु॑णः । मि॒त्रः । अ॒ग्निः । सः । इ॒मम् । य॒ज्ञम् । मधु॑ऽमन्तम् । कृ॒धि॒ । नः॒ । तनू॑ऽनपात् । घृ॒तऽयो॑निम् । वि॒धन्त॑म् ॥

The Pada Paath - transliteration

yam | devāsaḥ | triḥ | ahan | āyajante | dive--dive | varuṇaḥ | mitraḥ | agniḥ | saḥ | imam | yajñam | madhu-mantam | kṛdhi | naḥ | tanū-napāt | ghṛta-yonim | vidhantam

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-004/mantra-rig-03-004-003

MANTRA NUMBER:

Mantra 3 of Sukta 4 of Mandal 3 of Rig Veda
Mantra 3 of Varga 22 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 52 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- आप्रियः

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

प्र दीधि॑तिर्वि॒श्ववा॑रा जिगाति॒ होता॑रमि॒ळः प्र॑थ॒मं यज॑ध्यै । अच्छा॒ नमो॑भिर्वृ॒ष॒भं व॒न्दध्यै॒ स दे॒वान्य॑क्षदिषि॒तो यजी॑यान् ॥

The Mantra without meters (Sanskrit)

प्र दीधितिर्विश्ववारा जिगाति होतारमिळः प्रथमं यजध्यै । अच्छा नमोभिर्वृषभं वन्दध्यै स देवान्यक्षदिषितो यजीयान् ॥

The Mantra's transliteration in English

pra dīdhitir viśvavārā jigāti hotāram iḻaḥ prathamaṁ yajadhyai | acchā namobhir vṛṣabhaṁ vandadhyai sa devān yakṣad iṣito yajīyān ||

The Pada Paath (Sanskrit)

प्र । दीधि॑तिः । वि॒श्वऽवा॑रा । जि॒गा॒ति॒ । होता॑रम् । इ॒ळः । प्र॒थ॒मम् । यज॑ध्यै । अच्छ॑ । नमः॑ऽभिः । वृ॒ष॒भम् । व॒न्दध्यै॑ । सः । दे॒वान् । य॒क्ष॒त् । इ॒षि॒तः । यजी॑यान् ॥

The Pada Paath - transliteration

pra | dīdhitiḥ | viśva-vārā | jigāti | hotāram | iḻaḥ | prathamam | yajadhyai | accha | namaḥ-bhiḥ | vṛṣabham | vandadhyai | saḥ | devān | yakṣat | iṣitaḥ | yajīyān

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-004/mantra-rig-03-004-004

MANTRA NUMBER:

Mantra 4 of Sukta 4 of Mandal 3 of Rig Veda
Mantra 4 of Varga 22 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 53 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- आप्रियः

छन्द: (Chhand) :- स्वराट्पङ्क्ति

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

ऊ॒र्ध्वो वां॑ गा॒तुर॑ध्व॒रे अ॑कार्यू॒र्ध्वा शो॒चींषि॒ प्रस्थि॑ता॒ रजां॑सि । दि॒वो वा॒ नाभा॒ न्य॑सादि॒ होता॑ स्तृ॒णी॒महि॑ दे॒वव्य॑चा॒ वि ब॒र्हिः ॥

The Mantra without meters (Sanskrit)

ऊर्ध्वो वां गातुरध्वरे अकार्यूर्ध्वा शोचींषि प्रस्थिता रजांसि । दिवो वा नाभा न्यसादि होता स्तृणीमहि देवव्यचा वि बर्हिः ॥

The Mantra's transliteration in English

ūrdhvo vāṁ gātur adhvare akāry ūrdhvā śocīṁṣi prasthitā rajāṁsi | divo vā nābhā ny asādi hotā stṛṇīmahi devavyacā vi barhiḥ ||

The Pada Paath (Sanskrit)

ऊ॒र्ध्वः । वा॒म् । गा॒तुः । अ॒ध्व॒रे । अ॒का॒रि॒ । ऊ॒र्ध्वा । शो॒चींषि॑ । प्रस्थि॑ता । रजां॑सि । दि॒वः । वा॒ । नाभा॑ । नि । अ॒सा॒दि॒ । होता॑ । स्तृ॒णी॒महि॑ । दे॒वऽव्य॑चाः । वि । ब॒र्हिः ॥

The Pada Paath - transliteration

ūrdhvaḥ | vām | gātuḥ | adhvare | akāri | ūrdhvā | śocīṃṣi | prasthitā | rajāṃsi | divaḥ | vā | nābhā | ni | asādi | hotā | stṛṇīmahi | deva-vyacāḥ | vi | barhiḥ

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-004/mantra-rig-03-004-005

MANTRA NUMBER:

Mantra 5 of Sukta 4 of Mandal 3 of Rig Veda
Mantra 5 of Varga 22 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 54 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- आप्रियः

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

स॒प्त हो॒त्राणि॒ मन॑सा वृणा॒ना इन्व॑न्तो॒ विश्वं॒ प्रति॑ यन्नृ॒तेन॑ । नृ॒पेश॑सो वि॒दथे॑षु॒ प्र जा॒ता अ॒भी३॒॑मं य॒ज्ञं वि च॑रन्त पू॒र्वीः ॥

The Mantra without meters (Sanskrit)

सप्त होत्राणि मनसा वृणाना इन्वन्तो विश्वं प्रति यन्नृतेन । नृपेशसो विदथेषु प्र जाता अभीमं यज्ञं वि चरन्त पूर्वीः ॥

The Mantra's transliteration in English

sapta hotrāṇi manasā vṛṇānā invanto viśvam prati yann ṛtena | nṛpeśaso vidatheṣu pra jātā abhīmaṁ yajñaṁ vi caranta pūrvīḥ ||

The Pada Paath (Sanskrit)

स॒प्त । हो॒त्राणि॑ । मन॑सा । वृ॒णा॒नाः । इ॒न्व॑न्तः । विश्व॑म् । प्रति॑ । य॒न् । ऋ॒तेन॑ । नृ॒ऽपेश॑सः । वि॒दथे॑षु । प्र । जा॒ताः । अ॒भि । इ॒मम् । य॒ज्ञम् । वि । च॒र॒न्त॒ । पू॒र्वीः ॥

The Pada Paath - transliteration

sapta | hotrāṇi | manasā | vṛṇānāḥ | invantaḥ | viśvam | prati | yan | ṛtena | nṛ-peśasaḥ | vidatheṣu | pra | jātāḥ | abhi | imam | yajñam | vi | caranta | pūrvīḥ

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-004/mantra-rig-03-004-006

MANTRA NUMBER:

Mantra 6 of Sukta 4 of Mandal 3 of Rig Veda
Mantra 1 of Varga 23 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 55 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- आप्रियः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

आ भन्दमाने उषसा उपाके उत स्मयेते तन्वा३ विरूपे । यथा नो मित्रो वरुणो जुजोषदिन्द्रो मरुत्वाँ उत वा महोभिः ॥

The Mantra without meters (Sanskrit)

आ भन्दमाने उषसा उपाके उत स्मयेते तन्वा विरूपे । यथा नो मित्रो वरुणो जुजोषदिन्द्रो मरुत्वाँ उत वा महोभिः ॥

The Mantra's transliteration in English

ā bhandamāne uṣasā upāke uta smayete tanvā virūpe | yathā no mitro varuṇo jujoṣad indro marutvām̐ uta vā mahobhiḥ ||

The Pada Paath (Sanskrit)

आ । भन्दमाने इति । उषसौ । उपाके इति । उत । स्मयेते इति । तन्वा । विरूपे इति विऽरूपे । यथा । नः । मित्रः । वरुणः । जुजोषत् । इन्द्रः । मरुत्वान् । उत । वा । महःऽभिः ॥

The Pada Paath - transliteration

ā | bhandamāneiti | uṣasau | upāke iti | uta | smayeteiti | tanvā | virūpeitivi-rūpe | yathā | naḥ | mitraḥ | varuṇaḥ | jujoṣat | indraḥ | marutvān | uta | vā | mahaḥ-bhiḥ

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-004/mantra-rig-03-004-007

MANTRA NUMBER:

Mantra 7 of Sukta 4 of Mandal 3 of Rig Veda
Mantra 2 of Varga 23 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 56 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- आप्रियः

छन्द: (Chhand) :- स्वराट्पङ्क्ति

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

दैव्या॒ होता॑रा प्रथ॒मा न्यृ॑ञ्जे स॒प्त पृ॒क्षासः॑ स्व॒धया॑ मदन्ति । ऋ॒तं शंस॑न्त ऋ॒तमित्त आ॑हु॒रनु॑ व्र॒तं व्र॑त॒पा दीध्या॑नाः ॥

The Mantra without meters (Sanskrit)

दैव्या होतारा प्रथमा न्यृञ्जे सप्त पृक्षासः स्वधया मदन्ति । ऋतं शंसन्त ऋतमित्त आहुरनु व्रतं व्रतपा दीध्यानाः ॥

The Mantra's transliteration in English

daivyā hotārā prathamā ny ṛñje sapta pṛkṣāsaḥ svadhayā madanti | ṛtaṁ śaṁsanta ṛtam it ta āhur anu vrataṁ vratapā dīdhyānāḥ ||

The Pada Paath (Sanskrit)

दैव्या॑ । होता॑रा । प्र॒थ॒मा । नि । ऋ॒ञ्जे॒ । स॒प्त । पृ॒क्षासः॑ । स्व॒धया॑ । म॒द॒न्ति॒ । ऋ॒तम् । शंस॑न्तः । ऋ॒तम् । इत् । ते । आ॒हुः॒ । अनु॑ । व्र॒तम् । व्र॒त॒ऽपाः । दीध्या॑नाः ॥

The Pada Paath - transliteration

daivyā | hotārā | prathamā | ni | ṛñje | sapta | pṛkṣāsaḥ | svadhayā | madanti | ṛtam | śaṃsantaḥ | ṛtam | it | te | āhuḥ | anu | vratam | vrata-pāḥ | dīdhyānāḥ

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-004/mantra-rig-03-004-008

MANTRA NUMBER:

Mantra 8 of Sukta 4 of Mandal 3 of Rig Veda
Mantra 3 of Varga 23 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 57 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- आप्रियः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

आ भार॑ती भार॑तीभिः स॒जोषा॒ इळा॑ दे॒वैर्म॑नु॒ष्ये॑भिर॒ग्निः । सर॑स्वती सारस्व॒तेभि॑र॒र्वाक्ति॒स्रो दे॒वीर्ब॒र्हिरेदं स॑दन्तु ॥

The Mantra without meters (Sanskrit)

आ भारती भारतीभिः सजोषा इळा देवैर्मनुष्येभिरग्निः । सरस्वती सारस्वतेभिरर्वाक्तिस्रो देवीर्बर्हिरेदं सदन्तु ॥

The Mantra's transliteration in English

ā bhāratī bhāratībhiḥ sajoṣā iḻā devair manuṣyebhir agniḥ | sarasvatī sārasvatebhir arvāk tisro devīr barhir edaṁ sadantu ||

The Pada Paath (Sanskrit)

आ । भार॑ती । भार॑तीभिः । स॒ऽजोषाः॑ । इळाः॑ । दे॒वैः । म॒नु॒ष्ये॑भिः । अ॒ग्निः । सर॑स्वती । सा॒र॒स्व॒तेभिः॑ । अ॒र्वाक् । ति॒स्रः । दे॒वीः । ब॒र्हिः । आ । इ॒दम् । स॒द॒न्तु ॥

The Pada Paath - transliteration

ā | bhāratī | bhāratībhiḥ | sa-joṣāḥ | iḻāḥ | devaiḥ | manuṣyebhiḥ | agniḥ | sarasvatī | sārasvatebhiḥ | arvāk | tisraḥ | devīḥ | barhiḥ | ā | idam | sadantu

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-004/mantra-rig-03-004-009

MANTRA NUMBER:

Mantra 9 of Sukta 4 of Mandal 3 of Rig Veda
Mantra 4 of Varga 23 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 58 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- आप्रियः

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

तन्न॑स्तु॒रीप॒मध॑ पोषयि॒त्नु देव॑ त्वष्ट॒र्वि र॑रा॒णः स्य॑स्व । यतो॑ वी॒रः क॑र्म॒ण्यः॑ सु॒दक्षो॑ यु॒क्तग्रा॑वा॒ जाय॑ते दे॒वका॑मः ॥

The Mantra without meters (Sanskrit)

तन्नस्तुरीपमध पोषयित्नु देव त्वष्टर्वि रराणः स्यस्व । यतो वीरः कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामः ॥

The Mantra's transliteration in English

tan nas turīpam adha poṣayitnu deva tvaṣṭar vi rarāṇaḥ syasva | yato vīraḥ karmaṇyaḥ sudakṣo yuktagrāvā jāyate devakāmaḥ ||

The Pada Paath (Sanskrit)

तत् । नः॒ । तु॒रीप॑म् । अध॑ । पो॒ष॒यि॒त्नु । देव॑ । त्व॒ष्टः॒ । वि । र॒रा॒णः । स्य॒स्वेति॑ स्यस्व । यतः॑ । वी॒रः । क॒र्म॒ण्यः॑ । सु॒ऽदक्षः॑ । यु॒क्तऽग्रा॑वा । जाय॑ते । दे॒वऽका॑मः ॥

The Pada Paath - transliteration

tat | naḥ | turīpam | adha | poṣayitnu | deva | tvaṣṭaḥ | vi | rarāṇaḥ | syasveti syasva | yataḥ | vīraḥ | karmaṇyaḥ | su-dakṣaḥ | yukta-grāvā | jāyate | deva-kāmaḥ

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-004/mantra-rig-03-004-010

MANTRA NUMBER:

Mantra 10 of Sukta 4 of Mandal 3 of Rig Veda
Mantra 5 of Varga 23 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 59 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- आप्रियः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

वन॑स्पते॒ऽव॑ सृ॒जोप॑ दे॒वान॒ग्निर्ह॒विः श॑मि॒ता सू॑दयाति । सेदु॒ होता॑ स॒त्यत॑रो यजाति॒ यथा॑ दे॒वानां॒ जनि॑मानि॒ वेद॑ ॥

The Mantra without meters (Sanskrit)

वनस्पतेऽव सृजोप देवानग्निर्हविः शमिता सूदयाति । सेदु होता सत्यतरो यजाति यथा देवानां जनिमानि वेद ॥

The Mantra's transliteration in English

vanaspate 'va sṛjopa devān agnir haviḥ śamitā sūdayāti | sed u hotā satyataro yajāti yathā devānāṁ janimāni veda ||

The Pada Paath (Sanskrit)

वन॑स्पते । अव॑ । सृ॒ज॒ । उप॑ । दे॒वान् । अ॒ग्निः । ह॒विः । श॒मि॒ता । सू॒द॒या॒ति॒ । सः । इत् । ऊँ॒ इति॑ । होता॑ । स॒त्यऽत॑रः । य॒जा॒ति॒ । यथा॑ । दे॒वाना॑म् । जनि॑मानि । वेद॑ ॥

The Pada Paath - transliteration

vanaspate | ava | sṛja | upa | devān | agniḥ | haviḥ | śamitā | sūdayāti | saḥ | it | oṃ iti | hotā | satya-taraḥ | yajāti | yathā | devānām | janimāni | veda

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-004/mantra-rig-03-004-011

MANTRA NUMBER:

Mantra 11 of Sukta 4 of Mandal 3 of Rig Veda
Mantra 6 of Varga 23 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 60 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- आप्रियः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

आ याह्यग्ने समिधानो अर्वाङिन्द्रेण देवैः सरथं तुरेभिः । बर्हिर्न आस्तामदितिः सुपुत्रा स्वाहा देवा अमृता मादयन्ताम् ॥

The Mantra without meters (Sanskrit)

आ याह्यग्ने समिधानो अर्वाङिन्द्रेण देवैः सरथं तुरेभिः । बर्हिर्न आस्तामदितिः सुपुत्रा स्वाहा देवा अमृता मादयन्ताम् ॥

The Mantra's transliteration in English

ā yāhy agne samidhāno arvāṅ indreṇa devaiḥ sarathaṁ turebhiḥ | barhir na āstām aditiḥ suputrā svāhā devā amṛtā mādayantām ||

The Pada Paath (Sanskrit)

आ । याहि । अग्ने । सम्ऽइधानः । अर्वाङ् । इन्द्रेण । देवैः । सऽरथम् । तुरेभिः । बर्हिः । नः । आस्ताम् । अदितिः । सुऽपुत्रा । स्वाहा । देवाः । अमृताः । मादयन्ताम् ॥

The Pada Paath - transliteration

ā | yāhi | agne | sam-idhānaḥ | arvāṅ | indreṇa | devaiḥ | sa-ratham | turebhiḥ | barhiḥ | naḥ | āstām | aditiḥ | su-putrā | svāhā | devāḥ | amṛtāḥ | mādayantām

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-005/mantra-rig-03-005-001

MANTRA NUMBER:

Mantra 1 of Sukta 5 of Mandal 3 of Rig Veda
Mantra 1 of Varga 24 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 61 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- अग्निः

छन्द: (Chhand) :- भुरिक्पङ्क्ति

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

प्रत्य॒ग्निरु॒षस॒श्चेकि॑ता॒नोऽबो॑धि॒ विप्रः॑ पद॒वीः क॑वी॒नाम्। पृ॒थु॒पाजा॑ देव॒यद्भिः॒ समि॒द्धोऽप॒ द्वारा॒ तम॑सो॒ वह्नि॑रावः॥

The Mantra without meters (Sanskrit)

प्रत्यग्निरुषसश्चेकितानोऽबोधि विप्रः पदवीः कवीनाम्। पृथुपाजा देवयद्भिः समिद्धोऽप द्वारा तमसो वह्निरावः॥

The Mantra's transliteration in English

praty agnir uṣasaś cekitāno 'bodhi vipraḥ padavīḥ kavīnām | pṛthupājā devayadbhiḥ samiddho 'pa dvārā tamaso vahnir āvaḥ ||

The Pada Paath (Sanskrit)

प्रति॑। अ॒ग्निः। उ॒षसः॑। चेकि॑तानः। अबो॑धि। विप्रः॑। प॒द॒ऽवीः। क॒वी॒नाम्। पृ॒थु॒ऽपाजाः॑। दे॒व॒यत्ऽभिः॑। समि॑द्धः। अप॑। द्वारा॑। तम॑सः। वह्निः॑। आ॒व॒रित्या॑वः॥

The Pada Paath - transliteration

prati | agniḥ | uṣasaḥ | cekitānaḥ | abodhi | vipraḥ | pada-vīḥ | kavīnām | pṛthu-pājāḥ | devayat-bhiḥ | samiddhaḥ | apa | dvārā | tamasaḥ | vahniḥ | āvar ity āvaḥ

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-005/mantra-rig-03-005-002

MANTRA NUMBER:

Mantra 2 of Sukta 5 of Mandal 3 of Rig Veda
Mantra 2 of Varga 24 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 62 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- अग्निः

छन्द: (Chhand) :- भुरिक्पङ्क्ति

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

प्रेद्व॒ग्निर्वा॑वृधे॒ स्तोमे॑भिर्गी॒र्भिः स्तो॒तॄ॒णां न॑म॒स्य॑ उ॒क्थैः । पू॒र्वीर्ऋ॒तस्य॑ सं॒दृशं॑श्चका॒नः सं दू॒तो अ॑द्यौदु॒षसो॑ विरो॒के ॥

The Mantra without meters (Sanskrit)

प्रेद्वग्निर्वावृधे स्तोमेभिर्गीर्भिः स्तोतॄणां नमस्य उक्थैः । पूर्वीर्ऋतस्य संदृशश्चकानः सं दूतो अद्यौदुषसो विरोके ॥

The Mantra's transliteration in English

pred v agnir vāvṛdhe stomebhir gīrbhiḥ stotṝṇāṁ namasya ukthaiḥ | pūrvīr ṛtasya saṁdṛśaś cakānaḥ saṁ dūto adyaud uṣaso viroke ||

The Pada Paath (Sanskrit)

प्र । इत् । ऊँ इति॑ । अ॒ग्निः । व॒वृ॒धे॒ । स्तोमे॑भिः । गीः॒ऽभिः । स्तो॒तॄ॒णाम् । न॒म॒स्यः॑ । उ॒क्थैः । पू॒र्वीः । ऋ॒तस्य॑ । स॒म्ऽदृशः॑ । च॒का॒नः । सम् । दू॒तः । अ॒द्यौ॒त् । उ॒षसः॑ । वि॒ऽरो॒के ॥

The Pada Paath - transliteration

pra | it | oṃ iti | agniḥ | vavṛdhe | stomebhiḥ | gīḥ-bhiḥ | stotṝṇām | namasyaḥ | ukthaiḥ | pūrvīḥ | ṛtasya | sam-dṛśaḥ | cakānaḥ | sam | dūtaḥ | adyaut | uṣasaḥ | vi-roke

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-005/mantra-rig-03-005-003

MANTRA NUMBER:

Mantra 3 of Sukta 5 of Mandal 3 of Rig Veda
Mantra 3 of Varga 24 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 63 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- अग्निः

छन्द: (Chhand) :- पङ्क्तिः

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

अधा॑य्य॒ग्निर्मानु॑षीषु वि॒क्ष्व१॒॑पां गर्भो॑ मि॒त्र ऋ॒तेन॒ साध॑न् । आ ह॑र्य॒तो य॑ज॒तः सान्व॑स्था॒दभू॑दु॒ विप्रो॒ हव्यो॑ मती॒नाम् ॥

The Mantra without meters (Sanskrit)

अधाय्यग्निर्मानुषीषु विक्ष्वपां गर्भो मित्र ऋतेन साधन् । आ हर्यतो यजतः सान्वस्थादभूदु विप्रो हव्यो मतीनाम् ॥

The Mantra's transliteration in English

adhāyy agnir mānuṣīṣu vikṣv apāṁ garbho mitra ṛtena sādhan | ā haryato yajataḥ sānv asthād abhūd u vipro havyo matīnām ||

The Pada Paath (Sanskrit)

अधा॑यि । अ॒ग्निः । मानु॑षीषु । वि॒क्षु । अ॒पाम् । गर्भः॑ । मि॒त्रः । ऋ॒तेन॑ । साध॑न् । आ । ह॒र्य॒तः । य॒ज॒तः । सानु॑ । अ॒स्था॒त् । अभू॑त् । ऊँ इति॑ । विप्रः॑ । हव्यः॑ । म॒ती॒नाम् ॥

The Pada Paath - transliteration

adhāyi | agniḥ | mānuṣīṣu | vikṣu | apām | garbhaḥ | mitraḥ | ṛtena | sādhan | ā | hiryataḥ | yajataḥ | sānu | asthāt | abhūt | oṃ iti | vipraḥ | havyaḥ | matīnām

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-005/mantra-rig-03-005-004

MANTRA NUMBER:

Mantra 4 of Sukta 5 of Mandal 3 of Rig Veda
Mantra 4 of Varga 24 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 64 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- अग्निः

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

मि॒त्रो अ॒ग्निर्भ॑वति॒ यत्समि॑द्धो मि॒त्रो होता॒ वरु॑णो जा॒तवे॑दाः। मि॒त्रो अ॑ध्व॒र्युरि॑षि॒रो दमू॑ना मि॒त्रः सिन्धू॑नामु॒त पर्व॑तानाम्॥

The Mantra without meters (Sanskrit)

मित्रो अग्निर्भवति यत्समिद्धो मित्रो होता वरुणो जातवेदाः। मित्रो अध्वर्युरिषिरो दमूना मित्रः सिन्धूनामुत पर्वतानाम् ॥

The Mantra's transliteration in English

mitro agnir bhavati yat samiddho mitro hotā varuṇo jātavedāḥ | mitro adhvaryur iṣiro damūnā mitraḥ sindhūnām uta parvatānām ||

The Pada Paath (Sanskrit)

मि॒त्रः। अ॒ग्निः। भ॒व॒ति॒। यत्। सम्ऽइ॑द्धः। मि॒त्रः। होता॑। वरु॑णः। जा॒तऽवे॑दाः। मि॒त्रः। अ॒ध्व॒र्युः। इ॒षि॒रः। दमू॑नाः। मि॒त्रः। सिन्धू॑नाम्। उ॒त। पर्व॑तानाम्॥

The Pada Paath - transliteration

mitraḥ | agniḥ | bhavati | yat | sam-iddhaḥ | mitraḥ | hotā | varuṇaḥ | jata-vedāḥ | mitraḥ | adhvaryuḥ | iṣiraḥ | damūnāḥ | mitraḥ | sindhūnām | uta | parvatānām

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-005/mantra-rig-03-005-005

MANTRA NUMBER:

Mantra 5 of Sukta 5 of Mandal 3 of Rig Veda
Mantra 5 of Varga 24 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 65 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- अग्निः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

पाति॑ प्रि॒यं रि॒पो अग्रं॑ प॒दं वेः पाति॑ य॒ह्वश्चर॑णं॒ सूर्य॑स्य । पाति॒ नाभा॑ स॒प्तशी॑र्षाणम॒ग्निः पाति॑ दे॒वाना॑मु॒पमाद॑मृ॒ष्वः ॥

The Mantra without meters (Sanskrit)

पाति प्रियं रिपो अग्रं पदं वेः पाति यह्वश्चरणं सूर्यस्य । पाति नाभा सप्तशीर्षाणमग्निः पाति देवानामुपमादमृष्वः ॥

The Mantra's transliteration in English

pāti priyaṁ ripo agram padaṁ veḥ pāti yahvaś caraṇaṁ sūryasya | pāti nābhā saptaśīrṣāṇam agniḥ pāti devānām upamādam ṛṣvaḥ ||

The Pada Paath (Sanskrit)

पाति॑ । प्रि॒यम् । रि॒पः । अग्र॑म् । प॒दम् । वेः । पाति॑ । य॒ह्वः । चर॑णम् । सूर्य॑स्य । पाति॑ । नाभा॑ । स॒प्तऽशी॑र्षाणम् । अ॒ग्निः । पाति॑ । दे॒वाना॑म् । उ॒प॒ऽमाद॑म् । ऋ॒ष्वः ॥

The Pada Paath - transliteration

pāti | priyam | ripaḥ | agram | padam | veḥ | pāti | yahvaḥ | caraṇam | sūryasya | pāti | nābhā | sapta-śīrṣāṇām | agniḥ | pāti | devānām | upa-mādam | ṛṣvaḥ

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-005/mantra-rig-03-005-006

MANTRA NUMBER:

Mantra 6 of Sukta 5 of Mandal 3 of Rig Veda
Mantra 1 of Varga 25 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 66 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- अग्निः

छन्द: (Chhand) :- स्वराट्पङ्क्ति

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

ऋ॒भुश्च॑क्र॒ ईड्यं॒ चारु॒ नाम॒ विश्वा॑नि दे॒वो व॒युना॑नि वि॒द्वान्। स॒सस्य॒ चर्म॑ घृ॒तव॑त्प॒दं वेस्तदिद॒ग्नी र॑क्ष॒त्यप्र॑युच्छन्॥

The Mantra without meters (Sanskrit)

ऋभुश्चक्र ईड्यं चारु नाम विश्वानि देवो वयुनानि विद्वान्। ससस्य चर्म घृतवत्पदं वेस्तदिदग्नी रक्षत्यप्रयुच्छन्॥

The Mantra's transliteration in English

ṛbhuś cakra īḍyaṁ cāru nāma viśvāni devo vayunāni vidvān | sasasya carma ghṛtavat padaṁ ves tad id agnī rakṣaty aprayucchan ||

The Pada Paath (Sanskrit)

ऋ॒भुः। च॒क्रे॒। ईड्य॑म्। चारु॑। नाम॑। विश्वा॑नि। दे॒वः। व॒युना॑नि। वि॒द्वान्। स॒मस्य॑। चर्म॑। घृ॒तऽव॑त्। प॒दम्। वेः। तत्। इत्। अ॒ग्निः। र॒क्ष॒ति॒। अप्र॑ऽयुच्छन्॥

The Pada Paath - transliteration

ṛbhuḥ | cakre | īḍyam | cāru | nāma | viśvāni | devaḥ | vayunāni | vidvān | samasya | carma | ghṛta-vat padam | veḥ | tat | it | agniḥ | rakṣati | apra-yucchan

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-005/mantra-rig-03-005-007

MANTRA NUMBER:

Mantra 7 of Sukta 5 of Mandal 3 of Rig Veda
Mantra 2 of Varga 25 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 67 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- अग्निः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

आ योनि॑म॒ग्निर्घृ॒तव॑न्तमस्थात्पृ॒थुप्र॑गाणमु॒शन्त॑मुशा॒नः । दीद्या॑न॒: शुचि॑र्ऋ॒ष्वः पा॑व॒कः पुन॑:पुनर्मा॒तरा॒ नव्य॑सी कः ॥

The Mantra without meters (Sanskrit)

आ योनिमग्निर्घृतवन्तमस्थात्पृथुप्रगाणमुशन्तमुशानः । दीद्यानः शुचिऋष्वः पावकः पुनःपुनर्मातरा नव्यसी कः ॥

The Mantra's transliteration in English

ā yonim agnir ghṛtavantam asthāt pṛthupragāṇam uśantam uśānaḥ | dīdyānaḥ śucir ṛṣvaḥ pāvakaḥ punaḥ-punar mātarā navyasī kaḥ ||

The Pada Paath (Sanskrit)

आ । योनि॑म् । अ॒ग्निः । घृ॒तऽव॑न्तम् । अ॒स्था॒त् । पृ॒थुऽप्र॑गानम् । उ॒शन्त॑म् । उ॒शा॒नः । दीद्या॑नः । शुचि॑: । ऋ॒ष्वः । पा॒व॒कः । पुन॑:ऽपुनः । मा॒तरा॑ । नव्य॑सी॒ इति॑ । क॒रिति॑ कः ॥

The Pada Paath - transliteration

ā | yonim | agniḥ | ghṛta-vantam | asthāt | pṛthu-pragānam | uśantam | uśānaḥ | dīdyānaḥ | śuciḥ | ṛṣvaḥ | pāvakaḥ | punaḥ-punaḥ | mātarā | navyasī iti | karitikaḥ

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-005/mantra-rig-03-005-008

MANTRA NUMBER:

Mantra 8 of Sukta 5 of Mandal 3 of Rig Veda
Mantra 3 of Varga 25 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 68 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- अग्निः

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

स॒द्यो जा॒त ओष॑धीभिर्ववक्षे॒ यदी॒ वर्ध॑न्ति प्र॒स्वो॑ घृ॒तेन॑ । आप॑ इव प्र॒वता॒ शुम्भ॑माना उरु॒ष्यद॒ग्निः पि॒त्रोरु॒पस्थे॑ ॥

The Mantra without meters (Sanskrit)

सद्यो जात ओषधीभिर्ववक्षे यदी वर्धन्ति प्रस्वो घृतेन । आप इव प्रवता शुम्भमाना उरुष्यदग्निः पित्रोरुपस्थे ॥

The Mantra's transliteration in English

sadyo jāta oṣadhībhir vavakṣe yadī vardhanti prasvo ghṛtena | āpa iva pravatā śumbhamānā uruṣyad agniḥ pitror upasthe ||

The Pada Paath (Sanskrit)

स॒द्यः । जा॒तः । ओष॑धीभिः । व॒व॒क्षे॒ । यदि॑ । वर्ध॑न्ति । प्र॒ऽस्वः॑ । घृ॒तेन॑ । आपः॑ऽइव । प्र॒ऽवता॑ । शुम्भ॑मानाः । उ॒रु॒ष्यत् । अ॒ग्निः । पि॒त्रोः । उ॒पऽस्थे॑ ॥

The Pada Paath - transliteration

sadyaḥ | jātaḥ | oṣadhībhiḥ | vavakṣe | yadi | vardhanti | pra-svaḥ | ghṛtena | āpaḥ-iva | pra-vatā | śumbhamānāḥ | uruṣyat | agniḥ | pitroḥ | upa-sthe

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-005/mantra-rig-03-005-009

MANTRA NUMBER:

Mantra 9 of Sukta 5 of Mandal 3 of Rig Veda
Mantra 4 of Varga 25 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 69 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- अग्निः

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

उदु ष्टुतः समिधा यह्वो अद्यौद्वर्ष्मन्दिवो अधि नाभा पृथिव्याः । मित्रो अग्निरीड्यो मातरिश्वा दूतो वक्षद्यजथाय देवान् ॥

The Mantra without meters (Sanskrit)

उदु ष्टुतः समिधा यह्वो अद्यौद्वर्ष्मन्दिवो अधि नाभा पृथिव्याः । मित्रो अग्निरीड्यो मातरिश्वा दूतो वक्षद्यजथाय देवान् ॥

The Mantra's transliteration in English

ud u ṣṭutaḥ samidhā yahvo adyaud varṣman divo adhi nābhā pṛthivyāḥ | mitro agnir īḍyo mātariśvā dūto vakṣad yajathāya devān ||

The Pada Paath (Sanskrit)

उत् । ऊआम् इति । स्तुतः । सम्ऽइधा । यह्वः । अद्यौत् । वर्ष्मन् । दिवः । अधि । नाभा । पृथिव्याः । मित्रः । अग्निः । ईड्यः । मातरिश्वा । आ । दूतः । वक्षत् । यजथाय । देवान् ॥

The Pada Paath - transliteration

ut | ūām iti | stutaḥ | sam-idhā | yahvaḥ | adyaut | varṣman | divaḥ | adhi | nābhā | pṛthivyāḥ | mitraḥ | agniḥ | īḍyaḥ | mātariśvā | ā | dūtaḥ | vakṣat | yajathāya | devān

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-005/mantra-rig-03-005-010

MANTRA NUMBER:

Mantra 10 of Sukta 5 of Mandal 3 of Rig Veda
Mantra 5 of Varga 25 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 70 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- अग्निः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

उदस्तम्भीत्समिधा नाकमृष्वो३ऽग्निर्भवन्नुत्तमो रोचनानाम् । यदी भृगुभ्यः परि मातरिश्वा गुहा सन्तं हव्यवाहं समीधे ॥

The Mantra without meters (Sanskrit)

उदस्तम्भीत्समिधा नाकमृष्वोऽग्निर्भवन्नुत्तमो रोचनानाम् । यदी भृगुभ्यः परि मातरिश्वा गुहा सन्तं हव्यवाहं समीधे ॥

The Mantra's transliteration in English

ud astambhīt samidhā nākam ṛṣvo 'gnir bhavann uttamo rocanānām | yadī bhṛgubhyaḥ pari mātariśvā guhā santaṁ havyavāhaṁ samīdhe ||

The Pada Paath (Sanskrit)

उत् । अस्तम्भीत् । सम्ऽइधा । नाकम् । ऋष्वः । अग्निः । भवन् । उत्ऽतमः । रोचनानाम् । यदि । भृगुऽभ्यः । परि । मातरिश्वा । गुहा । सन्तम् । हव्यऽवाहम् । सम्ऽईधे ॥

The Pada Paath - transliteration

ut | astambhīt | sam-idhā | nākam | ṛṣvaḥ | agniḥ | bhavan | ut-tamaḥ | rocanānām | yadi | bhṛgu-bhyaḥ | pari | mātariśvā | guhā | santam | havya-vāham | sam-īdhe

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-005/mantra-rig-03-005-011

MANTRA NUMBER:

Mantra 11 of Sukta 5 of Mandal 3 of Rig Veda
Mantra 6 of Varga 25 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 71 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- अग्निः

छन्द: (Chhand) :- भुरिक्पङ्क्ति

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

इळा॒मग्ने पुरु॒दंसं॑ स॒निं गोः श॑श्वत्त॒मं हव॑मानाय साध । स्यान्नः॑ सू॒नुस्तन॑यो वि॒जावाग्ने॒ सा ते॑ सुम॒तिर्भू॑त्व॒स्मे ॥

The Mantra without meters (Sanskrit)

इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध । स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥

The Mantra's transliteration in English

iḻām agne purudaṁsaṁ saniṁ goḥ śaśvattamaṁ havamānāya sādha | syān naḥ sūnus tanayo vijāvāgne sā te sumatir bhūtv asme ||

The Pada Paath (Sanskrit)

इळा॑म् । अ॒ग्ने॒ । पु॒रु॒ऽदंस॑म् । स॒निम् । गोः । श॒श्व॒त्ऽत॒मम् । हव॑मानाय । सा॒ध॒ । स्यात् । नः॒ । सू॒नुः॒ । तन॑यः । वि॒जाऽवा॑ । अ॒ग्ने॒ । सा । ते॒ । सु॒ऽम॒तिः । भू॒तु॒ । अ॒स्मे इति॑ ॥

The Pada Paath - transliteration

iḷām | agne | puru-daṃsam | sanim | goḥ | śaśvat-tamam | havamānāya | sādha | syāt | naḥ | sūnuḥ | tanayaḥ | vijāvā | agne | sā | te | su-matiḥ | bhūtu | asme iti

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-006/mantra-rig-03-006-001

MANTRA NUMBER:

Mantra 1 of Sukta 6 of Mandal 3 of Rig Veda
Mantra 1 of Varga 26 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 72 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- अग्निः

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

प्र कारवो मनना वच्यमाना देवद्रीचीं नयत देवयन्तः । दक्षिणावाड्वाजिनी प्राच्येति हविर्भरन्त्यग्नये घृताची ॥

The Mantra without meters (Sanskrit)

प्र कारवो मनना वच्यमाना देवद्रीचीं नयत देवयन्तः । दक्षिणावाड्वाजिनी प्राच्येति हविर्भरन्त्यग्नये घृताची ॥

The Mantra's transliteration in English

pra kāravo mananā vacyamānā devadrīcīṁ nayata devayantaḥ | dakṣiṇāvāḍ vājinī prācy eti havir bharanty agnaye ghṛtācī ||

The Pada Paath (Sanskrit)

प्र । कारवः । मनना । वच्यमानाः । देवद्रीचीन् । नयत । देवऽयन्तः । दक्षिणाऽवाट् । वाजिनी । प्राची । एति । हविः । भरन्ती । अग्नये । घृताची ॥

The Pada Paath - transliteration

pra | kāravaḥ | mananā | vacyamānāḥ | devadrīcīn | nayata | deva-yantaḥ | dakṣiṇāvāṭ | vājinī | prācī | eti | haviḥ | bharantī | agnaye | ghṛtācī

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-006/mantra-rig-03-006-002

MANTRA NUMBER:

Mantra 2 of Sukta 6 of Mandal 3 of Rig Veda
Mantra 2 of Varga 26 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 73 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- अग्निः

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

आ रोद॑सी अपृणा॒ जाय॑मान उ॒त प्र रि॑क्था॒ अध॒ नु प्र॑यज्यो । दि॒वश्चि॑दग्ने महि॒ना पृ॑थि॒व्या व॒च्यन्तां॑ ते॒ वह्न॑यः स॒प्तजि॑ह्वाः ॥

The Mantra without meters (Sanskrit)

आ रोदसी अपृणा जायमान उत प्र रिक्था अध नु प्रयज्यो । दिवश्चिदग्ने महिना पृथिव्या वच्यन्तां ते वह्नयः सप्तजिह्वाः ॥

The Mantra's transliteration in English

ā rodasī apṛṇā jāyamāna uta pra rikthā adha nu prayajyo | divaś cid agne mahinā pṛthivyā vacyantāṁ te vahnayaḥ saptajihvāḥ ||

The Pada Paath (Sanskrit)

आ । रोद॑सी॒ इति॑ । अ॒पृ॒णाः॒ । जाय॑मानः । उ॒त । प्र । रि॒क्थाः॒ । अध॑ । नु । प्र॒य॒ज्यो॒ इति॑ प्रऽयज्यो । दे॒वः । चि॒त् । अ॒ग्ने॒ । म॒हि॒ना । पृ॒थि॒व्याः । व॒च्यन्ता॑म् । ते॒ । वह्न॑यः । स॒प्तऽजि॑ह्वाः ॥

The Pada Paath - transliteration

ā | rodasī iti | apṛṇāḥ | jāyamānaḥ | uta | pra | rikthāḥ | adha | nu | prayajyo itipra-yajyo | devaḥ | cit | agne | mahinā | pṛthivyāḥ | vacyantām | te | vahnayaḥ | sapta-jihvāḥ

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-006/mantra-rig-03-006-003

MANTRA NUMBER:

Mantra 3 of Sukta 6 of Mandal 3 of Rig Veda
Mantra 3 of Varga 26 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 74 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- अग्निः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

द्यौश्च॑ त्वा पृथि॒वी य॒ज्ञिया॑सो॒ नि होता॑रं सादयन्त॒े दमा॑य । यदी॒ विशो॒ मानु॑षीर्दे॒वयन्ती॒ः प्रय॑स्वती॒रीळ॑ते शु॒क्रम॒र्चिः ॥

The Mantra without meters (Sanskrit)

द्यौश्च त्वा पृथिवी यज्ञियासो नि होतारं सादयन्ते दमाय । यदी विशो मानुषीर्देवयन्तीः प्रयस्वतीरीळते शुक्रमर्चिः ॥

The Mantra's transliteration in English

dyauś ca tvā pṛthivī yajñiyāso ni hotāraṁ sādayante damāya | yadī viśo mānuṣīr devayantīḥ prayasvatīr īḻate śukram arciḥ ||

The Pada Paath (Sanskrit)

द्यौः । च॒ । त्वा॒ । पृ॒थि॒वी । य॒ज्ञिया॑सः । नि । होता॑रम् । सा॒द॒य॒न्ते॒ । दमा॑य । यदि॑ । विशः॑ । मानु॑षीः । दे॒व॒ऽयन्तीः॑ । प्रय॑स्वतीः । ईळ॑ते । शु॒क्रम् । अ॒र्चिः ॥

The Pada Paath - transliteration

dyauḥ | ca | tvā | pṛthivī | yajñiyāsaḥ | ni | hotāram | sādayante | damāya | yadi | viśaḥ | mānuṣīḥ | deva-yantīḥ | prayasvatīḥ | īḻate | śukram | arciḥ

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-006/mantra-rig-03-006-004

MANTRA NUMBER:

Mantra 4 of Sukta 6 of Mandal 3 of Rig Veda
Mantra 4 of Varga 26 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 75 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- अग्निः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

म॒हान्त्स॒धस्थे॑ ध्रु॒व आ निष॑त्तो॒ऽन्तर्द्या॒वा॒ माहि॑ने॒ हर्य॑माणः । आस्क्रे॑ स॒पत्नी॑ अ॒जरे॒ अमृ॑क्ते सब॒र्दुघे॑ उरुगा॒यस्य॑ धे॒नू ॥

The Mantra without meters (Sanskrit)

महान्त्सधस्थे ध्रुव आ निषत्तोऽन्तर्द्यावा माहिने हर्यमाणः । आस्क्रे सपत्नी अजरे अमृक्ते सबर्दुघे उरुगायस्य धेनू ॥

The Mantra's transliteration in English

mahān sadhasthe dhruva ā niṣatto 'ntar dyāvā māhine haryamāṇaḥ | āskre sapatnī ajare amṛkte sabardughe urugāyasya dhenū ||

The Pada Paath (Sanskrit)

म॒हान् । स॒धऽस्थे॑ । ध्रु॒वः । आ । निऽस॑त्तः । अ॒न्तः । द्यावा॑ । माहि॑ने॒ इति॑ । हर्य॑माणः । आस्क्रे॒ इति॑ । स॒पत्नी॒ इति॑ स॒ऽपत्नी॑ । अ॒जरे॒ इति॑ । अमृ॑क्ते॒ इति॑ । स॒ब॒र्दुघे॒ इति॑ स॒बः॒ऽदुघे॑ । उ॒रु॒ऽगा॒यस्य॑ । धे॒नू इति॑ ॥

The Pada Paath - transliteration

mahān | sadha-sthe | dhruvaḥ | ā | ni-sattaḥ | antaḥ | dyāvā | māhineiti | haryamāṇaḥ | āskre iti | sapatnī itisa-patnī | ajareiti | amṛkte iti | sabardugheitisabaḥ-dughe | uru-gāyasya | dhenū iti

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-006/mantra-rig-03-006-005

MANTRA NUMBER:

Mantra 5 of Sukta 6 of Mandal 3 of Rig Veda
Mantra 5 of Varga 26 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 76 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- अग्निः

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

व्र॒ता ते॑ अग्ने मह॒तो म॒हानि॒ तव॑ क्रत्वा॒ रोद॑सी॒ आ त॑तन्थ । त्वं दू॒तो अ॑भवो॒ जाय॑मान॒स्त्वं ने॒ता वृ॑षभ चर्षणी॒नाम् ॥

The Mantra without meters (Sanskrit)

व्रता ते अग्ने महतो महानि तव क्रत्वा रोदसी आ ततन्थ । त्वं दूतो अभवो जायमानस्त्वं नेता वृषभ चर्षणीनाम् ॥

The Mantra's transliteration in English

vratā te agne mahato mahāni tava kratvā rodasī ā tatantha | tvaṁ dūto abhavo jāyamānas tvaṁ netā vṛṣabha carṣaṇīnām ||

The Pada Paath (Sanskrit)

व्र॒ता । ते॒ । अ॒ग्ने॒ । म॒ह॒तः । म॒हानि॑ । तव॑ । क्रत्वा॑ । रोद॑सी॒ इति॑ । आ । त॒त॒न्थ॒ । त्वम् । दू॒तः । अ॒भ॒वः॒ । जाय॑मानः । त्वम् । ने॒ता । वृ॒ष॒भ॒ । च॒र्ष॒णी॒नाम् ॥

The Pada Paath - transliteration

vratā | te | agne | mahataḥ | mahāni | tava | kratvā | rodasī iti | ā | tatantha | tvam | dūtaḥ | abhavaḥ | jāyamānaḥ | tvam | netā | vṛṣabha | caṣarṇīnām

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-006/mantra-rig-03-006-006

MANTRA NUMBER:

Mantra 6 of Sukta 6 of Mandal 3 of Rig Veda
Mantra 1 of Varga 27 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 77 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- अग्निः

छन्द: (Chhand) :- भुरिक्पङ्क्ति

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

ऋ॒तस्य॑ वा के॒शिना॑ यो॒ग्याभि॑र्घृत॒स्नुवा॒ रोहि॑ता धु॒रि धि॑ष्व । अथा॑ वह दे॒वान्दे॑व॒ विश्वा॑न्त्स्वध्व॒रा कृ॑णुहि जातवेदः ॥

The Mantra without meters (Sanskrit)

ऋतस्य वा केशिना योग्याभिर्घृतस्नुवा रोहिता धुरि धिष्व । अथा वह देवान्देव विश्वान्त्स्वध्वरा कृणुहि जातवेदः ॥

The Mantra's transliteration in English

ṛtasya vā keśinā yogyābhir ghṛtasnuvā rohitā dhuri dhiṣva | athā vaha devān deva viśvān svadhvarā kṛṇuhi jātavedaḥ ||

The Pada Paath (Sanskrit)

ऋ॒तस्य॑ । वा॒ । के॒शिना॑ । यो॒ग्याभिः॑ । घृ॒त॒ऽस्नुवा॑ । रोहि॑ता । धु॒रि । धि॒ष्व॒ । अथ॑ । व॒ह । दे॒वान् । दे॒व॒ । विश्वा॑न् । सु॒ऽअ॒ध्व॒रा । कृ॒णु॒हि॒ । जा॒त॒ऽवे॒दः॒ ॥

The Pada Paath - transliteration

ṛtasya | vā | keśinā | yogyābhiḥ | ghṛta-snuvā | rohitā | dhuri | dhiṣva | atha | vaha | devān | deva | viśvān | su-adhvarā | kṛṇuhi | jāta-vedaḥ

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-006/mantra-rig-03-006-007

MANTRA NUMBER:

Mantra 7 of Sukta 6 of Mandal 3 of Rig Veda
Mantra 2 of Varga 27 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 78 of Anuvaak 1 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गाथिनो विश्वामित्रः

देवता (Devataa) :- अग्निः

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

दि॒वश्चि॒दा ते॑ रुचयन्त रो॒का उ॒षो वि॑भा॒तीरनु॑ भासि पू॒र्वीः । अ॒पो यद॑ग्न उ॒शध॒ग्वने॑षु होतु॑र्म॒न्द्रस्य॑ प॒नय॑न्त दे॒वाः ॥

The Mantra without meters (Sanskrit)

दिवश्चिदा ते रुचयन्त रोका उषो विभातीरनु भासि पूर्वीः । अपो यदग्न उशधग्वनेषु होतुर्मन्द्रस्य पनयन्त देवाः ॥

The Mantra's transliteration in English

divaś cid ā te rucayanta rokā uṣo vibhātīr anu bhāsi pūrvīḥ | apo yad agna uśadhag vaneṣu hotur mandrasya panayanta devāḥ ||

The Pada Paath (Sanskrit)

दि॒वः । चि॒त् । आ । ते॒ । रु॒च॒य॒न्त॒ । रो॒काः । उ॒षः । वि॒ऽभा॒तीः । अनु॑ । भा॒सि॒ । पू॒र्वीः । अ॒पः । यत् । अ॒ग्ने॒ । उ॒शध॑क् । वने॑षु । होतु॒रिति॑ । म॒न्द्रस्य॑ । प॒नय॑न्त । दे॒वाः ॥

The Pada Paath - transliteration

ya ime rodasī ubhe aham indram atuṣṭavam | viśvāmitrasya rakṣati brahmedam bhārataṁ janam ||

The Pada Paath (Sanskrit)

यः । इ॒मे इति॑ । रोद॑सी॒ इति॑ । उ॒भे इति॑ । अ॒हम् । इन्द्र॑म् । अतु॑स्तवम् । वि॒श्वामि॑त्रस्य । र॒क्ष॒ति॒ । ब्रह्म॑ । इ॒दम् । भार॑तम् । जन॑म् ॥

The Pada Paath - transliteration

yaḥ | ime iti | rodasī iti | ubhe iti | aham | indram | atustavam | viśvāmitrasya | rakṣati | brahma | idam | bhāratam | janam

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-053/mantra-rig-03-053-013

MANTRA NUMBER:

Mantra 13 of Sukta 53 of Mandal 3 of Rig Veda
Mantra 3 of Varga 21 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 112 of Anuvaak 4 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गोपवन आत्रेयः सप्तवध्रिर्वा

देवता (Devataa) :- इन्द्र:

छन्द: (Chhand) :- निचृद्गायत्री

स्वर: (Swar) :- षड्जः

THE MANTRA

The Mantra with meters (Sanskrit)

वि॒श्वामि॑त्रा अरासत॒ ब्रह्मेन्द्रा॑य व॒ज्रिणे॑ । कर॒दिन्नः॑ सु॒राध॑सः ॥

The Mantra without meters (Sanskrit)

विश्वामित्रा अरासत ब्रह्मेन्द्राय वज्रिणे । करदिन्नः सुराधसः ॥

The Mantra's transliteration in English

viśvāmitrā arāsata brahmendrāya vajriṇe | karad in naḥ surādhasaḥ ||

The Pada Paath (Sanskrit)

वि॒श्वामि॑त्राः । अ॒रा॒स॒त॒ । ब्रह्म॑ । इन्द्रा॑य । व॒ज्रिणे॑ । कर॑त् । इत् । न॒ः । सु॒ऽराध॑सः ॥

The Pada Paath - transliteration

viśvāmitrāḥ | arāsata | brahma | indrāya | vajriṇe | karat | it | naḥ | su-rādhasaḥ

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-053/mantra-rig-03-053-014

MANTRA NUMBER:

Mantra 14 of Sukta 53 of Mandal 3 of Rig Veda
Mantra 4 of Varga 21 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 113 of Anuvaak 4 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गोपवन आत्रेयः सप्तवध्रिर्वा

देवता (Devataa) :- इन्द्र:

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

किं ते॑ कृ॒ण्वन्ति॒ कीक॑टेषु॒ गावो॒ नाशिरं॑ दु॒ह्रे न त॑पन्ति घ॒र्मम् । आ नो॑ भर॒ प्रम॑गन्दस्य॒ वेदो॑ नैचाशा॒खं म॑घवन्रन्धया नः ॥

The Mantra without meters (Sanskrit)

किं ते कृण्वन्ति कीकटेषु गावो नाशिरं दुह्रे न तपन्ति घर्मम् । आ नो भर प्रमगन्दस्य वेदो नैचाशाखं मघवन्रन्धया नः ॥

The Mantra's transliteration in English

kiṁ te kṛṇvanti kīkaṭeṣu gāvo nāśiraṁ duhre na tapanti gharmam | ā no bhara pramagandasya vedo naicāśākham maghavan randhayā naḥ ||

The Pada Paath (Sanskrit)

किम् । ते॒ । कृ॒ण्व॒न्ति॒ । कीक॑टेषु । गावः॑ । न । आ॒ऽशिर॑न् । दु॒ह्रे । न । त॒प॒न्ति॒ । घ॒र्मम् । आ । नः॒ । भ॒र॒ । प्रऽम॑गन्दस्य । वेदः॑ । नै॒चा॒ऽशा॒खम् । म॒घ॒ऽव॒न् । र॒न्ध॒य॒ । नः॒ ॥

The Pada Paath - transliteration

kim | te | kṛṇvanti | kīkaṭeṣu | gāvaḥ | na | āśiran | duhre | na | tapanti | gharmam | ā | naḥ | bhara | pra-magandasya | vedaḥ | naicāśākham | magha-van | randhaya | naḥ

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-053/mantra-rig-03-053-015

MANTRA NUMBER:

Mantra 15 of Sukta 53 of Mandal 3 of Rig Veda
Mantra 5 of Varga 21 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 114 of Anuvaak 4 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गोपवन आत्रेयः सप्तवध्रिर्वा

देवता (Devataa) :- वाक्

छन्द: (Chhand) :- स्वराट्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

स॒स॒र्प॒रीरम॑तिं॒ बाध॑माना बृ॒हन्मि॑माय ज॒मद॑ग्निदत्ता । आ सूर्य॑स्य दु॒हि॒ता त॑ता॒न॒ श्रवो॑ दे॒वेष्व॒मृत॑मजु॒र्यम् ॥

The Mantra without meters (Sanskrit)

ससर्परीरमतिं बाधमाना बृहन्मिमाय जमदग्निदत्ता । आ सूर्यस्य दुहिता ततान श्रवो देवेष्वमृतमजुर्यम् ॥

The Mantra's transliteration in English

sasarparīr amatim bādhamānā bṛhan mimāya jamadagnidattā | ā sūryasya duhitā tatāna śravo deveṣv amṛtam ajuryam ||

The Pada Paath (Sanskrit)

स॒स॒र्प॒रीः । अम॑तिम् । बाध॑माना । बृ॒हत् । मि॒मा॒य॒ । ज॒मद॑ग्निऽदत्ता । आ । सूर्य॑स्य । दु॒हि॒ता । त॒ता॒न॒ । श्रवः॑ । दे॒वेषु॑ । अ॒मृत॑म् । अ॒जु॒र्यम् ॥

The Pada Paath - transliteration

sasarparīḥ | amatim | bādhamānā | bṛhat | mimāya | jamadagni-dattā | ā | sūryasya | duhitā | tatāna | śravaḥ | deveṣu | amṛtam | ajuryam

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-053/mantra-rig-03-053-016

MANTRA NUMBER:

Mantra 16 of Sukta 53 of Mandal 3 of Rig Veda
Mantra 1 of Varga 22 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 115 of Anuvaak 4 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गोपवन आत्रेयः सप्तवध्रिर्वा

देवता (Devataa) :- वाक्

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

स॒स॒र्प॒रीर॑भर॒त्तूय॑मे॒भ्योऽधि॒ श्रवः॒ पाञ्च॑जन्यासु कृ॒ष्टिषु॑ । सा प॒क्ष्या॒३॒॑ नव्य॒मायु॒र्दधा॑ना॒ यां मे॑ पलस्तिजमद॒ग्नयो॑ द॒दुः ॥

The Mantra without meters (Sanskrit)

ससर्परीरभरत्तूयमेभ्योऽधि श्रवः पाञ्चजन्यासु कृष्टिषु । सा पक्ष्या नव्यमायुर्दधाना यां मे पलस्तिजमदग्नयो ददुः ॥

The Mantra's transliteration in English

sasarparīr abharat tūyam ebhyo 'dhi śravaḥ pāñcajanyāsu kṛṣṭiṣu | sā pakṣyā navyam āyur dadhānā yām me palastijamadagnayo daduḥ ||

The Pada Paath (Sanskrit)

स॒स॒र्प॒रीः । अ॒भ॒र॒त् । तूय॑म् । ए॒भ्यः॒ । अधि॑ । श्रवः॑ । पाञ्च॑ऽजन्यासु । कृ॒ष्टिषु॑ । सा । प॒क्ष्या॑ । नव्य॑म् । आयुः॑ । दधा॑ना । याम् । मे॒ । प॒लि॒स्ति॒ऽज॒म॒द॒ग्नयः॑ । द॒दुः ॥

The Pada Paath - transliteration

sasarparīḥ | abharat | tūyam | ebhyaḥ | adhi | śravaḥ | pāñca-janyāsu | kṛṣṭiṣu | sā | pakṣyā | navyam | āyuḥ | dadhānā | yām | me | palasti-jamadagnayaḥ | daduḥ

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-053/mantra-rig-03-053-017

MANTRA NUMBER:

Mantra 17 of Sukta 53 of Mandal 3 of Rig Veda
Mantra 2 of Varga 22 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 116 of Anuvaak 4 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गोपवन आत्रेयः सप्तवध्रिर्वा

देवता (Devataa) :- रथाङ्गानि

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

स्थि॒रौ गावौ॑ भवतां वी॒ळुरक्षो॒ मेषा वि व॑र्हि॒ मा यु॒गं वि शा॑रि । इन्द्र॑: पातु॒ल्ये॑ ददतां॒ शरी॑तो॒ररि॑ष्टनेमे अ॒भि न॑: सचस्व ॥

The Mantra without meters (Sanskrit)

स्थिरौ गावौ भवतां वीळुरक्षो मेषा वि वर्हि मा युगं वि शारि । इन्द्रः पातल्ये ददतां शरीतोररिष्टनेमे अभि नः सचस्व ॥

The Mantra's transliteration in English

sthirau gāvau bhavatāṁ vī̱lur akṣo meṣā vi varhi mā yugaṁ vi śāri | indraḥ pātalye dadatāṁ śarītor ariṣṭaneme abhi naḥ sacasva ||

The Pada Paath (Sanskrit)

स्थि॒रौ । गावौ॑ । भ॒व॒ता॒म् । वी॒ळुः । अक्षः॑ । मा । ई॒षा । वि । व॒र्हि॒ । मा । यु॒गम् । वि । शा॒रि॒ । इन्द्रः॑ । पा॒त॒ल्ये॒ इति॑ । द॒द॒ता॒म् । शरी॑तोः । अरि॑ष्टऽनेमे । अ॒भि । न॒ः । स॒च॒स्व॒ ॥

The Pada Paath - transliteration

sthirau | gāvau | bhavatām | vīḷuḥ | akṣaḥ | mā | īṣā | vi | varhi | mā | yugam | vi | śāri | indraḥ | pātalye iti | dadatām | śarītoḥ | ariṣṭa-neme | abhi | naḥ | sacasva

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-053/mantra-rig-03-053-018

MANTRA NUMBER:

Mantra 18 of Sukta 53 of Mandal 3 of Rig Veda
Mantra 3 of Varga 22 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 117 of Anuvaak 4 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गोपवन आत्रेयः सप्तवध्रिर्वा

देवता (Devataa) :- रथाङ्गानि

छन्द: (Chhand) :- निचृद्बृहती

स्वर: (Swar) :- मध्यमः

THE MANTRA

The Mantra with meters (Sanskrit)

बलं॑ धेहि त॒नूषु॑ नो॒ बल॑मिन्द्रान॒ळुत्सु॑ नः। बलं॑ तो॒काय॒ तन॑याय जी॒वसे॒ त्वं हि ब॑ल॒दा असि॑ ॥

The Mantra without meters (Sanskrit)

बलं धेहि तनूषु नो बलमिन्द्रानळुत्सु नः। बलं तोकाय तनयाय जीवसे त्वं हि बलदा असि ॥

The Mantra's transliteration in English

balaṁ dhehi tanūṣu no balam indrāna l̲utsu naḥ | balaṁ tokāya tanayāya jīvase tvaṁ hi baladā asi ||

The Pada Paath (Sanskrit)

बल॑म्। धे॒हि॒। त॒नूषु॑। नः॒। बल॑म्। इ॒न्द्र॒। अ॒न॒ळुत्ऽसु॑। नः॒। बल॑म्। तो॒काय॑। तन॑याय। जी॒वसे॑। त्वम्। हि। ब॒ल॒ऽदाः। असि॑ ॥

The Pada Paath - transliteration

balam | dhehi | tanūṣu | naḥ | balam | indra | anaḷut-su | naḥ | balam | tokāya | tanayāya | jīvase | tvam | hi | bala-dāḥ | asi

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-053/mantra-rig-03-053-019

MANTRA NUMBER:

Mantra 19 of Sukta 53 of Mandal 3 of Rig Veda
Mantra 4 of Varga 22 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 118 of Anuvaak 4 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गोपवन आत्रेयः सप्तवध्रिर्वा

देवता (Devataa) :- रथाङ्गानि

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒भि व्य॑यस्व खदि॒रस्य॒ सार॒मोजो॑ धेहि स्पन्द॒ने शिं॒शपा॑याम् । अक्ष॑ वीळो वीळित वी॒ळय॑स्व॒ मा यामा॑द॒स्मादव॑ जीहिपो नः ॥

The Mantra without meters (Sanskrit)

अभि व्ययस्व खदिरस्य सारमोजो धेहि स्पन्दने शिंशपायाम् । अक्ष वीळो वीळित वीळयस्व मा यामादस्मादव जीहिपो नः ॥

The Mantra's transliteration in English

abhi vyayasva khadirasya sāram ojo dhehi spandane śiṁśapāyām | akṣa vīl̲o vīl̲ita vīl̲ayasva mā yāmād asmād ava jīhipo naḥ ||

The Pada Paath (Sanskrit)

अ॒भि । व्य॒य॒स्व॒ । ख॒दि॒रस्य॑ । सार॑म् । ओजः॑ । धे॒हि॒ । स्प॒न्द॒ने । शिं॒शपा॑याम् । अक्ष॑ । वी॒ळो॒ इति॑ । वी॒ळि॒त॒ । वी॒ळय॑स्व । मा । यामा॑त् । अ॒स्मात् । अव॑ । जी॒हि॒पः॒ । नः॒ ॥

The Pada Paath - transliteration

abhi | vyayasva | khadirasya | sāram | ojaḥ | dhehi | spandane | śiṃśapāyām | akṣa | vīḷo iti | vīḷita | vīḷayasva | mā | yāmāt | asmāt | ava | jīhipaḥ | naḥ

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-053/mantra-rig-03-053-020

MANTRA NUMBER:

Mantra 20 of Sukta 53 of Mandal 3 of Rig Veda
Mantra 5 of Varga 22 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 119 of Anuvaak 4 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गोपवन आत्रेयः सप्तवध्रिर्वा

देवता (Devataa) :- रथाङ्गानि

छन्द: (Chhand) :- भुरिगनुष्टुप्

स्वर: (Swar) :- गान्धारः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒यम॒स्मान्वन॒स्पति॒र्मा च॒ हा मा च॑ रीरिषत् । स्व॒स्त्या गृ॒हेभ्य॒ आव॒सा आ वि॒मोच॑नात् ॥

The Mantra without meters (Sanskrit)

अयमस्मान्वनस्पतिर्मा च हा मा च रीरिषत् । स्वस्त्या गृहेभ्य आवसा आ विमोचनात् ॥

The Mantra's transliteration in English

ayam asmān vanaspatir mā ca hā mā ca rīriṣat | svasty ā gṛhebhya āvasā ā vimocanāt ||

The Pada Paath (Sanskrit)

अ॒यम् । अ॒स्मान् । वन॒स्पतिः॑ । मा । च॒ । हाः । मा । च॒ । रि॒रि॒षत् । स्व॒स्ति । आ । गृ॒हेभ्यः॑ । आ । अ॒व॒सै । आ । वि॒ऽमोच॑नात् ॥

The Pada Paath - transliteration

ayam | asmān | vanaspatiḥ | mā | ca | hāḥ | mā | ca | ririṣat | svasti | ā | gṛhebhyaḥ | ā | avasai | ā | vi-mocanāt

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-053/mantra-rig-03-053-021

MANTRA NUMBER:

Mantra 21 of Sukta 53 of Mandal 3 of Rig Veda
Mantra 1 of Varga 23 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 120 of Anuvaak 4 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गोपवन आत्रेयः सप्तवध्रिर्वा

देवता (Devataa) :- इन्द्र:

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

इन्द्रो॒तिभि॑र्बहु॒लाभि॑र्नो अ॒द्य या॑च्छ्रे॒ष्ठाभि॑र्मघवञ्छूर जिन्व । यो नो॒ द्वेष्ट्यध॑रः॒ सस्प॑दीष्ट॒ यमु॑ द्वि॒ष्मस्तमु॑ प्रा॒णो ज॑हातु ॥

The Mantra without meters (Sanskrit)

इन्द्रोतिभिर्बहुलाभिर्नो अद्य याच्छ्रेष्ठाभिर्मघवञ्छूर जिन्व । यो नो द्वेष्ट्यधरः सस्पदीष्ट यमु द्विष्मस्तमु प्राणो जहातु ॥

The Mantra's transliteration in English

indrotibhir bahulābhir no adya yācchreṣṭhābhir maghavañ chūra jinva | yo no dveṣṭy adharaḥ sas padīṣṭa yam u dviṣmas tam u prāṇo jahātu ||

The Pada Paath (Sanskrit)

इन्द्र॑ । ऊ॒तिऽभिः॑ । ब॒हु॒लाभिः॑ । नः॒ । अ॒द्य । या॒त्ऽश्रे॒ष्ठाभिः॑ । म॒घ॒ऽव॒न् । शू॒र॒ । जि॒न्व॒ । यः । नः॒ । द्वेष्टि॑ । अध॑रः । सः । प॒दी॒ष्ट॒ । यम् । ऊँ इति॑ । द्वि॒ष्मः । तम् । ऊँ इति॑ । प्रा॒णः । ज॒हा॒तु॒ ॥

The Pada Paath - transliteration

indra | ūti-bhiḥ | bahulābhiḥ | naḥ | adya | yāt-śreṣṭhābhiḥ | magha-van | śūra | ji nva | yaḥ | naḥ | dveṣṭi | adharaḥ | saḥ | padīṣṭa | yam | oṃ iti | dviṣmaḥ | tam | oṃ iti | prāṇaḥ | jahātu

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-053/mantra-rig-03-053-022

MANTRA NUMBER:

Mantra 22 of Sukta 53 of Mandal 3 of Rig Veda
Mantra 2 of Varga 23 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 121 of Anuvaak 4 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गोपवन आत्रेयः सप्तवध्रिर्वा

देवता (Devataa) :- इन्द्र:

छन्द: (Chhand) :- अनुष्टुप्

स्वर: (Swar) :- गान्धारः

THE MANTRA

The Mantra with meters (Sanskrit)

प॒र॒शुं चि॒द्वि तप॑ति शिम्ब॒लं चि॒द्वि वृ॑श्चति । उ॒खा चि॑दिन्द्र॒ येष॑न्ती॒ प्रय॑स्ता॒ फेन॑मस्यति ॥

The Mantra without meters (Sanskrit)

परशुं चिद्वि तपति शिम्बलं चिद्वि वृश्चति । उखा चिदिन्द्र येषन्ती प्रयस्ता फेनमस्यति ॥

The Mantra's transliteration in English

paraśuṁ cid vi tapati śimbalaṁ cid vi vṛścati | ukhā cid indra yeṣantī prayastā phenam asyati ||

The Pada Paath (Sanskrit)

प॒र॒शुम् । चि॒त् । वि । त॒प॒ति॒ । शि॒म्ब॒लम् । चि॒त् । वि । वृ॒श्च॒ति॒ । उ॒खा । चि॒त् । इ॒न्द्र॒ येष॑न्ती । प्रऽय॑स्ता । फेन॑म् । अ॒स्य॒ति॒ ॥

The Pada Paath - transliteration

paraśum | cit | vi | tapati | śimbalam | cit | vi | vṛścati | ukhā | cit | indra yeṣantī | pra-yastā | phenam | asyati

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-053/mantra-rig-03-053-023

MANTRA NUMBER:

Mantra 23 of Sukta 53 of Mandal 3 of Rig Veda
Mantra 3 of Varga 23 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 122 of Anuvaak 4 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गोपवन आत्रेयः सप्तवध्रिर्वा

देवता (Devataa) :- इन्द्र:

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

न सा॑यकस्य चिकिते जनासो लो॒धं न॑यन्ति॒ पशु॒ मन्य॑मानाः । नावा॑जिनं वा॒जिना॑ हासयन्ति॒ न ग॑र्द॒भं पु॒रो अश्वा॑न्नयन्ति ॥

The Mantra without meters (Sanskrit)

न सायकस्य चिकिते जनासो लोधं नयन्ति पशु मन्यमानाः । नावाजिनं वाजिना हासयन्ति न गर्दभं पुरो अश्वान्नयन्ति ॥

The Mantra's transliteration in English

na sāyakasya cikite janāso lodhaṁ nayanti paśu manyamānāḥ | nāvājinaṁ vājinā hāsayanti na gardabham puro aśvān nayanti ||

The Pada Paath (Sanskrit)

न । सा॑यकस्य । चि॒कि॒ते॒ । ज॒ना॒सः॒ । लो॒धम् । न॒य॒न्ति॒ । पशु॑ । मन्य॑मानाः । न । अवा॑जिनम् । वा॒जिना॑ । हा॒स॒य॒न्ति॒ । न । ग॒र्द॒भम् । पु॒रः । अश्वा॑त् । न॒य॒न्ति॒ ॥

The Pada Paath - transliteration

na | sāyakasya | cikite | janāsaḥ | lodham | nayanti | paśu | manyamānāḥ | na | avājinam | vājinā | hāsayanti | na | gardabham | puraḥ | aśvāt | nayanti

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-053/mantra-rig-03-053-024

MANTRA NUMBER:

Mantra 24 of Sukta 53 of Mandal 3 of Rig Veda
Mantra 4 of Varga 23 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 123 of Anuvaak 4 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गोपवन आत्रेयः सप्तवध्रिर्वा

देवता (Devataa) :- इन्द्र:

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

इ॒म इ॑न्द्र भर॒तस्य॑ पु॒त्रा अ॑पपि॒त्वं चि॑कितु॒र्न प्र॑पि॒त्वम् । हि॒न्वन्त्यश्व॒मर॑णं॒ न नित्यं॒ ज्या॑वाजं॒ परि॑ णयन्त्या॒जौ ॥

The Mantra without meters (Sanskrit)

इम इन्द्र भरतस्य पुत्रा अपपित्वं चिकितुर्न प्रपित्वम् । हिन्वन्त्यश्वमरणं न नित्यं ज्यावाजं परि णयन्त्याजौ ॥

The Mantra's transliteration in English

ima indra bharatasya putrā apapitvaṁ cikitur na prapitvam | hinvanty aśvam araṇaṁ na nityaṁ jyāvājam pari ṇayanty ājau ||

The Pada Paath (Sanskrit)

इ॒मे । इ॒न्द्र॒ । भ॒र॒तस्य॑ । पु॒त्राः । अ॒प॒ऽपि॒त्वम् । चि॒कि॒तुः॒ । न । प्र॒ऽपि॒त्वम् । हि॒न्वन्ति॑ । अश्व॑म् । अर॑णम् । न । नित्य॑म् । ज्या॒ऽवाज॑म् । परि॑ । न॒य॒न्ति॒ । आ॒जौ ॥

The Pada Paath - transliteration

ime | indra | bharatasya | putrāḥ | apa-pitvam | cikituḥ | na | pra-pitvam | hi nvanti | aśvam | araṇam | na | nityam | jyāvājam | pari | nayanti | ājau

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-054/mantra-rig-03-054-001

MANTRA NUMBER:

Mantra 1 of Sukta 54 of Mandal 3 of Rig Veda
Mantra 1 of Varga 24 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 1 of Anuvaak 5 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रजापतिर्वैश्वामित्रो वाच्यो वा

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- निचृत्पङ्क्ति

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

इ॒मं म॒हे वि॑द॒थ्या॑य शू॒षं शश्व॒त्कृत्व॒ ईड्या॑य॒ प्र ज॑भ्रुः । शृ॒णोतु॑ नो॒ दम्ये॑भि॒रनी॑कैः शृ॒णोत्व॒ग्निर्दि॒व्यैरज॑स्रः ॥

The Mantra without meters (Sanskrit)

इमं महे विदथ्याय शूषं शश्वत्कृत्व ईड्याय प्र जभ्रुः । शृणोतु नो दम्येभिरनीकैः शृणोत्वग्निर्दिव्यैरजस्रः ॥

The Mantra's transliteration in English

imam mahe vidathyāya śūṣaṁ śaśvat kṛtva īḍyāya pra jabhruḥ | śṛṇotu no damyebhir anīkaiḥ śṛṇotv agnir divyair ajasraḥ ||

The Pada Paath (Sanskrit)

इ॒मम् । म॒हे । वि॒द॒थ्या॑य । शू॒षम् । शश्व॑त् । कृत्व॑: । ईड्या॑य । प्र । ज॒भ्रुः॒ । शृ॒णोतु॑ । नः॒ । दम्ये॑भिः । अनी॑कैः । शृ॒णोतु॑ । अ॒ग्निः । दि॒व्यैः । अज॑स्रः ॥

The Pada Paath - transliteration

imam | mahe | vidathyāya | śūṣam | śaśvat | kṛtvaḥ | īḍyāya | pra | jabhruḥ | śṛṇotu | naḥ | damyebhiḥ | anīkaiḥ | śṛṇotu | agniḥ | divyaiḥ | ajasraḥ

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-054/mantra-rig-03-054-002

MANTRA NUMBER:

Mantra 2 of Sukta 54 of Mandal 3 of Rig Veda
Mantra 2 of Varga 24 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 2 of Anuvaak 5 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रजापतिर्वैश्वामित्रो वाच्यो वा

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

महि॑ म॒हे दि॒वे अ॑र्चा पृथि॒व्यै कामो॑ म इ॒च्छञ्च॑रति प्रजा॒नन् । ययो॑र्ह॒ स्तोमे॑ वि॒दथे॑षु दे॒वाः स॑प॒र्यवो॑ मा॒दय॑न्ते॒ सचा॒योः ॥

The Mantra without meters (Sanskrit)

महि महे दिवे अर्चा पृथिव्यै कामो म इच्छञ्चरति प्रजानन् । ययोर्ह स्तोमे विदथेषु देवाः सपर्यवो मादयन्ते सचायोः ॥

The Mantra's transliteration in English

mahi mahe dive arcā pṛthivyai kāmo ma icchañ carati prajānan | yayor ha stome vidatheṣu devāḥ saparyavo mādayante sacāyoḥ ||

The Pada Paath (Sanskrit)

महि॑ । म॒हे । दि॒वे । अ॒र्च॒ । पृ॒थि॒व्यै । कामः॑ । मे॒ । इ॒च्छन् । च॒र॒ति॒ । प्र॒ऽजा॒नन् । ययोः॑ । ह॒ । स्तोमे॑ । वि॒दथे॑षु । दे॒वाः । स॒प॒र्यवः॑ । मा॒दय॑न्ते । सचा॑ । आ॒योः ॥

The Pada Paath - transliteration

mahi | mahe | dive | arca | pṛthivyai | kāmaḥ | me | icchan | carati | pra-jānan | yayoḥ | ha | stome | vidatheṣu | devāḥ | saparyavaḥ | mādayante | sacā | āyoḥ

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-054/mantra-rig-03-054-003

MANTRA NUMBER:

Mantra 3 of Sukta 54 of Mandal 3 of Rig Veda
Mantra 3 of Varga 24 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 3 of Anuvaak 5 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रजापतिर्वैश्वामित्रो वाच्यो वा

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

युवोरृतं रोदसी सत्यमस्तु महे षु णः सुविताय प्र भूतम् । इदं दिवे नमो अग्ने पृथिव्यै सपर्यामि प्रयसा यामि रत्नम् ॥

The Mantra without meters (Sanskrit)

युवोरृतं रोदसी सत्यमस्तु महे षु णः सुविताय प्र भूतम् । इदं दिवे नमो अग्ने पृथिव्यै सपर्यामि प्रयसा यामि रत्नम् ॥

The Mantra's transliteration in English

yuvor ṛtaṁ rodasī satyam astu mahe ṣu ṇaḥ suvitāya pra bhūtam | idaṁ dive namo agne pṛthivyai saparyāmi prayasā yāmi ratnam ||

The Pada Paath (Sanskrit)

युवोः । ऋतम् । रोदसी इति । सत्यम् । अस्तु । महे । सु । नः । सुऽविताय । प्र । भूतम् । इदम् । दिवे । नमः । अग्ने । पृथिव्यै । सपर्यामि । प्रयसा । यामि । रत्नम् ॥

The Pada Paath - transliteration

yuvoḥ | ṛtam | rodasī iti | satyam | astu | mahe | su | ṇaḥ | su-vitāya | pra | bhūtam | idam | dive | namaḥ | agne | pṛthivyai | saparyāmi | prayasā | yāmi | ratnam

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-054/mantra-rig-03-054-004

MANTRA NUMBER:

Mantra 4 of Sukta 54 of Mandal 3 of Rig Veda
Mantra 4 of Varga 24 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 4 of Anuvaak 5 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रजापतिर्वैश्वामित्रो वाच्यो वा

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

उ॒तो हि वां॑ पू॒र्व्या आ॑विवि॒द्र ऋता॑वरी रोदसी स॒त्य॒वाचः॑ । नर॑श्चिद्वां स॒मिथे॒ शूर॑सातौ ववन्दि॒रे पृ॑थिवि॒ वेवि॑दानाः ॥

The Mantra without meters (Sanskrit)

उतो हि वां पूर्व्या आविविद्र ऋतावरी रोदसी सत्यवाचः । नरश्चिद्वां समिथे शूरसातौ ववन्दिरे पृथिवि वेविदानाः ॥

The Mantra's transliteration in English

uto hi vām pūrvyā āvividra ṛtāvarī rodasī satyavācaḥ | naraś cid vāṁ samithe śūrasātau vavandire pṛthivi vevidānāḥ ||

The Pada Paath (Sanskrit)

उ॒तो इति॑ । हि । वा॒म् । पू॒र्व्याः॑ । आ॒ऽवि॒वि॒द्रे । ऋत॑वरी॒ इत्यृत॑ऽवरी । रो॒द॒सी॒ इति॑ । स॒त्य॒ऽवाचः॑ । नरः॑ । चि॒त् । वा॒म् । स॒म्ऽइ॒थे । शूर॑ऽसातौ । व॒व॒न्दि॒रे । पृ॒थि॒वि॒ । वेवि॑दानाः ॥

The Pada Paath - transliteration

uto iti | hi | vām | pūrvyāḥ | āvividre | ṛtavarī ity ṛta-varī | rodasī iti | satya-vācaḥ | naraḥ | cit | vām | sam-ithe | śūra-sātau | vavandire | pṛthivi | vevidānāḥ

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-054/mantra-rig-03-054-005

MANTRA NUMBER:

Mantra 5 of Sukta 54 of Mandal 3 of Rig Veda
Mantra 5 of Varga 24 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 5 of Anuvaak 5 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रजापतिर्वैश्वामित्रो वाच्यो वा

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- स्वराट्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

को अ॒द्धा वे॑द॒ क इ॒ह प्र वो॑चद्दे॒वाँ अच्छा॑ प॒थ्या॒३॒॑ का समे॑ति । ददृ॑श्र एषामव॒मा सदां॑सि॒ परे॑षु॒ या गुह्ये॑षु व्र॒ते॑षु ॥

The Mantra without meters (Sanskrit)

को अद्धा वेद क इह प्र वोचद्देवाँ अच्छा पथ्या का समेति । ददृश्र एषामवमा सदांसि परेषु या गुह्येषु व्रतेषु ॥

The Mantra's transliteration in English

ko addhā veda ka iha pra vocad devām̐ acchā pathyā kā sam eti | dadṛśra eṣām avamā sadāṁsi pareṣu yā guhyeṣu vrateṣu ||

The Pada Paath (Sanskrit)

कः । अ॒द्धा । वे॑द॒ । कः । इ॒ह । प्र । वो॒च॒त् । दे॒वान् । अच्छ॑ । प॒थ्या॑ । का । सम् । ए॒ति॒ । ददृ॑श्रे । ए॒षा॒म् । अ॒व॒मा । सदां॑सि । परे॑षु । या । गुह्ये॑षु । व्र॒ते॑षु ॥

The Pada Paath - transliteration

kaḥ | addhā | veda | kaḥ | iha | pra | vocat | devān | accha | pathyā | kā | sam | eti | dadṛśre | eṣām | avamā | sadāṃsi | pareṣu | yā | guhyeṣu | vrateṣu

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-054/mantra-rig-03-054-006

MANTRA NUMBER:

Mantra 6 of Sukta 54 of Mandal 3 of Rig Veda
Mantra 1 of Varga 25 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 6 of Anuvaak 5 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रजापतिर्वैश्वामित्रो वाच्यो वा

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

क॒विर्नृ॒चक्षा॑ अ॒भि षी॑मचष्ट ऋ॒तस्य॒ योना॒ विघृ॑ते॒ मद॑न्ती । नाना॑ चक्राते॒ सद॑नं॒ यथा॒ वेः स॑मा॒नेन॒ क्रतु॑ना संविदा॒ने ॥

The Mantra without meters (Sanskrit)

कविर्नृचक्षा अभि षीमचष्ट ऋतस्य योना विघृते मदन्ती । नाना चक्राते सदनं यथा वेः समानेन क्रतुना संविदाने ॥

The Mantra's transliteration in English

kavir nṛcakṣā abhi ṣīm acaṣṭa ṛtasya yonā vighṛte madantī | nānā cakrāte sadanaṁ yathā veḥ samānena kratunā saṁvidāne ||

The Pada Paath (Sanskrit)

क॒विः । नृ॒ऽचक्षा॑ । अ॒भि । सी॒म् । अ॒च॒ष्ट॒ । ऋ॒तस्य॑ । योना॑ । विघृ॑ते॒ इति॒ विऽघृ॑ते । मद॑न्ती॒ इति॑ । नाना॑ । च॒क्रा॒ते॒ इति॑ । सद॑नम् । यथा॑ । वेः । स॒मा॒नेन॑ । क्रतु॑ना । स॒वँ॒म्वि॒दा॒ने इति॑ स॒म्ऽवि॒दा॒ने ॥

The Pada Paath - transliteration

kaviḥ | nṛ-cakṣā | abhi | sīm | acaṣṭa | ṛtasya | yonā | vighṛteitivi-ghṛte | madantī iti | nānā | cakrāteiti | sadanam | yathā | veḥ | samānena | kratunā | saṃvidāne itisam-vidāne

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-054/mantra-rig-03-054-007

MANTRA NUMBER:

Mantra 7 of Sukta 54 of Mandal 3 of Rig Veda
Mantra 2 of Varga 25 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 7 of Anuvaak 5 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रजापतिर्वैश्वामित्रो वाच्यो वा

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

स॒मा॒न्या वियु॑ते दू॒रेअ॑न्ते ध्रु॒वे प॒दे त॑स्थतु॒र्जाग॒रूके॑ । उ॒त स्वसा॑रा यु॒व॒ती भव॑न्ती॒ आदु॑ ब्रु॒वाते मिथु॒नानि॒ नाम॑ ॥

The Mantra without meters (Sanskrit)

समान्या वियुते दूरेअन्ते ध्रुवे पदे तस्थतुर्जागरूके । उत स्वसारा युवती भवन्ती आदु ब्रुवाते मिथुनानि नाम ॥

The Mantra's transliteration in English

samānyā viyute dūreante dhruve pade tasthatur jāgarūke | uta svasārā yuvatī bhavantī ād u bruvāte mithunāni nāma ||

The Pada Paath (Sanskrit)

स॒मा॒न्या । वियु॑ते॒ इति॒ वि॒ऽयु॑ते । दू॒रेअ॑न्ते॒ इति॑ दू॒रेऽअ॑न्ते । ध्रु॒वे । प॒दे । त॒स्थ॒तुः॒ जा॒ग॒रूके॑ । उ॒त । स्वसा॑रा । यु॒व॒ती इति॑ । भव॑न्ती॒ इति॑ । आत् । ऊँ॒ इति॑ । ब्रु॒वा॒ते॒ इति॑ । मि॒थु॒नानि॑ । नाम॑ ॥

The Pada Paath - transliteration

samānyā | viyuteitivi-yute | dūreanteitidūre--ante | dhruve | pade | tasthatuḥ jāgarūke | uta | svasārā | yuvatī iti | bhavantī iti | āt | oṃ iti | bruvāteiti | mithunāni | nāma

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-054/mantra-rig-03-054-008

MANTRA NUMBER:

Mantra 8 of Sukta 54 of Mandal 3 of Rig Veda
Mantra 3 of Varga 25 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 8 of Anuvaak 5 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रजापतिर्वैश्वामित्रो वाच्यो वा

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

वि॒श्वेदे॒ते जनि॑मा॒ सं वि॑विक्तो म॒हो दे॒वान्बिभ्र॑ती॒ न व्य॑थेते । एज॑द्ध्रु॒वं प॑त्यते॒ विश्व॒मेकं॒ चर॑त्पत॒त्रि विषु॑णं॒ वि जा॒तम् ॥

The Mantra without meters (Sanskrit)

विश्वेदेते जनिमा सं विविक्तो महो देवान्बिभ्रती न व्यथेते । एजद्ध्रुवं पत्यते विश्वमेकं चरत्पतत्रि विषुणं वि जातम् ॥

The Mantra's transliteration in English

viśved ete janimā saṁ vivikto maho devān bibhratī na vyathete | ejad dhruvam patyate viśvam ekaṁ carat patatri viṣuṇaṁ vi jātam ||

The Pada Paath (Sanskrit)

विश्वा॑ । इत् । ए॒ते इति॑ । जनि॑म । सम् । वि॒वि॒क्तः॒ । म॒हः । दे॒वान् । बिभ्र॑ती॒ इति॑ । न । व्य॒थे॒ते॒ इति॑ । एज॑त् । ध्रु॒वम् । प॒त्य॒ते॒ । विश्व॑म् । एक॑म् । चर॑त् । प॒त॒त्रि । विषु॑णम् । वि । जा॒तम् ॥

The Pada Paath - transliteration

viśvā | it | ete iti | janima | sam | viviktaḥ | mahaḥ | devān | bibhratī iti | na | vyatheteiti | ejat | dhruvam | patyate | viśvam | ekam | carat | patatri | v iṣuṇam | vi | jātam

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-054/mantra-rig-03-054-009

MANTRA NUMBER:

Mantra 9 of Sukta 54 of Mandal 3 of Rig Veda
Mantra 4 of Varga 25 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 9 of Anuvaak 5 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषिः (Rishi) :- प्रजापतिर्वैश्वामित्रो वाच्यो वा

देवता (Devataa) :- विश्वेदेवाः

छन्दः (Chhand) :- भुरिक्पङ्क्तिः

स्वरः (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

सना॑ पुरा॒णमध्ये॑म्या॒रान्म॒हः पि॒तुर्ज॑नि॒तुर्जा॒मि तन्नः॑ । दे॒वासो॒ यत्र॑ पनि॒तार॒ एवै॑रु॒रौ प॒थि व्यु॑ते त॒स्थुर॒न्तः ॥

The Mantra without meters (Sanskrit)

सना पुराणमध्येम्याराम्महः पितुर्जनितुर्जामि तन्नः । देवासो यत्र पनितार एवैरुरौ पथि व्युते तस्थुरन्तः ॥

The Mantra's transliteration in English

sanā purāṇam adhy emy ārān mahaḥ pitur janitur jāmi tan naḥ | devāso yatra panitāra evair urau pathi vyute tasthur antaḥ ||

The Pada Paath (Sanskrit)

सना॑ । पु॒रा॒णम् । अधि॑ । ए॒मि॒ । आ॒रात् । म॒हः । पि॒तुः । ज॒नि॒तुः । जा॒मि । तत् । नः॒ । दे॒वासः॑ । यत्र॑ । प॒नि॒तारः॑ । एवैः॑ । उ॒रौ । प॒थि । विऽउ॑ते । त॒स्थुः । अ॒न्तरिति॑ ॥

The Pada Paath - transliteration

sanā | purāṇam | adhi | emi | ārāt | mahaḥ | pituḥ | janituḥ | jāmi | tat | naḥ | devāsaḥ | yatra | panitāraḥ | evaiḥ | urau | pathi | vi-ute | tasthuḥ | antariti

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-054/mantra-rig-03-054-010

MANTRA NUMBER:

Mantra 10 of Sukta 54 of Mandal 3 of Rig Veda
Mantra 5 of Varga 25 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 10 of Anuvaak 5 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रजापतिर्वैश्वामित्रो वाच्यो वा

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

इ॒मं स्तोमं॑ रोद॑सी॒ प्र ब्र॑वीम्यृदू॒दराः॑ शृणवन्नग्निजि॒ह्वाः। मि॒त्रः स॒म्राजो॒ वरु॑णो॒ युवा॑न आदि॒त्यासः॑ क॒वयः॑ पप्रथा॒नाः॥

The Mantra without meters (Sanskrit)

इमं स्तोमं रोदसी प्र ब्रवीम्यृदूदराः शृणवन्नग्निजिह्वाः। मित्रः सम्राजो वरुणो युवान आदित्यासः कवयः पप्रथानाः॥

The Mantra's transliteration in English

imaṁ stomaṁ rodasī pra bravīmy ṛdūdarāḥ śṛṇavann agnijihvāḥ | mitraḥ samrājo varuṇo yuvāna ādityāsaḥ kavayaḥ paprathānāḥ ||

The Pada Paath (Sanskrit)

इ॒मम्। स्तोम॑म्। रो॒द॒सी॒ इति॑। प्र। ब्र॒वी॒मि॒। ऋ॒दू॒दराः॑। शृ॒ण॒व॒न्। अ॒ग्नि॒ऽजि॒ह्वाः। मि॒त्रः। स॒म्ऽराजः॑। वरु॑णः। युवा॑नः। आ॒दि॒त्यासः॑। क॒वयः॑। प॒प्र॒था॒नाः॥

The Pada Paath - transliteration

imam | stomam | rodasī iti | pra | bravīmi | ṛdūdarāḥ | śṛṇavan | agni-jihvāḥ | mitraḥ | sam-rājaḥ | varuṇaḥ | yuvānaḥ | ādityāsaḥ | kavayaḥ | paprathānāḥ

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-054/mantra-rig-03-054-011

MANTRA NUMBER:

Mantra 11 of Sukta 54 of Mandal 3 of Rig Veda
Mantra 1 of Varga 26 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 11 of Anuvaak 5 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रजापतिर्वैश्वामित्रो वाच्यो वा

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

हिरण्यपाणिः सविता सुजिह्वस्त्रिरा दिवो विदथे पत्यमानः । देवेषु च सवितः श्लोकमश्रेरादस्मभ्यमा सुव सर्वतातिम् ॥

The Mantra without meters (Sanskrit)

हिरण्यपाणिः सविता सुजिह्वस्त्रिरा दिवो विदथे पत्यमानः । देवेषु च सवितः श्लोकमश्रेरादस्मभ्यमा सुव सर्वतातिम् ॥

The Mantra's transliteration in English

hiraṇyapāṇiḥ savitā sujihvas trir ā divo vidathe patyamānaḥ | deveṣu ca savitaḥ ślokam aśrer ād asmabhyam ā suva sarvatātim ||

The Pada Paath (Sanskrit)

हिरण्यऽपाणिः । सविता । सुऽजिह्वः । त्रिः । आ । दिवः । विदथे । पत्यमानः । देवेषु । च । सवितरिति । श्लोकम् । अश्रेः । आत् । अस्मभ्यम् । आ । सुव । सर्वऽतातिम् ॥

The Pada Paath - transliteration

hiraṇya-pāṇiḥ | savitā | su-jihvaḥ | triḥ | ā | divaḥ | vidathe | patyamānaḥ | deveṣu | ca | savitariti | ślokam | aśreḥ | āt | asmabhyam | ā | suva | sarva-tātim

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-054/mantra-rig-03-054-012

MANTRA NUMBER:

Mantra 12 of Sukta 54 of Mandal 3 of Rig Veda
Mantra 2 of Varga 26 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 12 of Anuvaak 5 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रजापतिर्वैश्वामित्रो वाच्यो वा

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- स्वराट्पङ्क्ति

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

सु॒कृत्सु॑पा॒णिः स्ववाँ॑ ऋ॒तावा॑ दे॒वस्त्वष्टाव॑से॒ तानि॑ नो धात् । पू॒ष॒ण्वन्त॑ ऋभवो मादयध्वमू॒र्ध्वग्रा॑वाणो अध्व॒रम॑तष्ट ॥

The Mantra without meters (Sanskrit)

सुकृत्सुपाणिः स्ववाँ ऋतावा देवस्त्वष्टावसे तानि नो धात् । पूषण्वन्त ऋभवो मादयध्वमूर्ध्वग्रावाणो अध्वरमतष्ट ॥

The Mantra's transliteration in English

sukṛt supāṇiḥ svavām̐ ṛtāvā devas tvaṣṭāvase tāni no dhāt | pūṣaṇvanta ṛbhavo mādayadhvam ūrdhvagrāvāṇo adhvaram ataṣṭa ||

The Pada Paath (Sanskrit)

सु॒ऽकृत् । सु॒ऽपा॒णिः । स्वऽवा॑न् । ऋ॒तऽवा॑ । दे॒वः । त्वष्टा॑ । अव॑से । तानि॑ । न॒ः । धा॒त् । पू॒ष॒ण्ऽवन्त॒ः । ऋ॒भ॒व॒ः । मा॒द॒य॒ध्व॒म् । ऊ॒र्ध्वऽग्रा॑वाणः । अ॒ध्व॒रम् । अ॒त॒ष्ट ॥

The Pada Paath - transliteration

su-kṛt | su-pāṇiḥ | sva-vān | ṛta-vā | devaḥ | tvaṣṭā | avase | tāni | naḥ | dhāt | pūṣaṇ-vantaḥ | ṛbhavaḥ | mādayadhvam | ūrdhva-grāvāṇaḥ | adhvaram | ataṣṭa

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-054/mantra-rig-03-054-013

MANTRA NUMBER:

Mantra 13 of Sukta 54 of Mandal 3 of Rig Veda
Mantra 3 of Varga 26 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 13 of Anuvaak 5 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रजापतिर्वैश्वामित्रो वाच्यो वा

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

विद्युद्रथा मरुत ऋष्टिमन्तो दिवो मर्या ऋतजाता अयासः । सरस्वती शृणवन्यज्ञियासो धाता रयिं सहवीरं तुरासः ॥

The Mantra without meters (Sanskrit)

विद्युद्रथा मरुत ऋष्टिमन्तो दिवो मर्या ऋतजाता अयासः । सरस्वती शृणवन्यज्ञियासो धाता रयिं सहवीरं तुरासः ॥

The Mantra's transliteration in English

vidyudrathā maruta ṛṣṭimanto divo maryā ṛtajātā ayāsaḥ | sarasvatī śṛṇavan yajñiyāso dhātā rayiṁ sahavīraṁ turāsaḥ ||

The Pada Paath (Sanskrit)

विद्युत्ऽरथाः । मरुतः । ऋष्टिऽमन्तः । दिवः । मर्याः । ऋतऽजाताः । अयासः । सरस्वती । शृणवन् । यज्ञियासः । धात । रयिम् । सहऽवीरम् । तुरासः ॥

The Pada Paath - transliteration

vidyut-rathāḥ | marutaḥ | ṛṣṭi-mantaḥ | divaḥ | maryāḥ | ṛta-jātāḥ | ayāsaḥ | sarasvatī | śṛṇavan | yajñiyāsaḥ | dhāta | rayim | saha-vīram | turāsaḥ

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-054/mantra-rig-03-054-014

MANTRA NUMBER:

Mantra 14 of Sukta 54 of Mandal 3 of Rig Veda
Mantra 4 of Varga 26 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 14 of Anuvaak 5 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रजापतिर्वैश्वामित्रो वाच्यो वा

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

विष्णुं॒ स्तोमा॑सः पुरुद॒स्मम॒र्का भग॑स्येव का॒रिणो॒ याम॑नि ग्मन् । उ॒रु॒क्र॒मः क॑कु॒हो यस्य॑ पू॒र्वीर्न म॑र्धन्ति यु॒व॒तयो॒ जनि॑त्रीः ॥

The Mantra without meters (Sanskrit)

विष्णुं स्तोमासः पुरुदस्ममर्का भगस्येव कारिणो यामनि ग्मन् । उरुक्रमः ककुहो यस्य पूर्वीर्न मर्धन्ति युवतयो जनित्रीः ॥

The Mantra's transliteration in English

viṣṇuṁ stomāsaḥ purudasmam arkā bhagasyeva kāriṇo yāmani gman | urukramaḥ kakuho yasya pūrvīr na mardhanti yuvatayo janitrīḥ ||

The Pada Paath (Sanskrit)

विष्णु॑म् । स्तोमा॑सः । पु॒रु॒ऽद॒स्मम् । अ॒र्काः । भग॑स्यऽइव । का॒रिणः॑ । याम॑नि । ग्म॒न् । उ॒रु॒ऽक्र॒मः । क॒कु॒हः । यस्य॑ । पू॒र्वीः । न । म॒र्ध॒न्ति॒ । यु॒व॒तयः॑ । जनि॑त्रीः ॥

The Pada Paath - transliteration

viṣṇum | stomāsaḥ | puru-dasmam | arkāḥ | bhagasya-iva | kāriṇaḥ | yāmani | gman | uru-kramaḥ | kakuhaḥ | yasya | pūrvīḥ | na | mardhanti | yuvatayaḥ | janitrīḥ

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-054/mantra-rig-03-054-015

MANTRA NUMBER:

Mantra 15 of Sukta 54 of Mandal 3 of Rig Veda
Mantra 5 of Varga 26 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 15 of Anuvaak 5 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रजापतिर्वैश्वामित्रो वाच्यो वा

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

इन्द्रो॒ विश्वै॑र्वी॒र्यै॒३॑ः पत्य॑मान उ॒भे आ प॑प्रौ॒ रोद॑सी महि॒त्वा । पु॒रं॒द॒रो वृ॑त्र॒हा धृ॒ष्णुषे॑णः सं॒गृभ्या॑ न॒ आ भ॑रा॒ भूरि॑ प॒श्वः ॥

The Mantra without meters (Sanskrit)

इन्द्रो विश्वैर्वीर्यैः पत्यमान उभे आ पप्रौ रोदसी महित्वा । पुरंदरो वृत्रहा धृष्णुषेणः संगृभ्या न आ भरा भूरि पश्वः ॥

The Mantra's transliteration in English

indro viśvair vīryaiḥ patyamāna ubhe ā paprau rodasī mahitvā | puraṁdaro vṛtrahā dhṛṣṇuṣeṇaḥ saṁgṛbhyā na ā bharā bhūri paśvaḥ ||

The Pada Paath (Sanskrit)

इन्द्रः॑ । विश्वैः॑ । वी॒र्यैः॑ । पत्य॑मानः । उ॒भे इति॑ । आ । प॒प्रौ॒ । रोद॑सी॒ इति॑ । म॒हि॒ऽत्वा । पु॒र॒म्ऽद॒रः । वृ॒त्र॒ऽहा । धृ॒ष्णु॒ऽसे॑नः । स॒म्ऽगृभ्य॑ । न॒ः । आ । भ॒र॒ । भूरि॑ । प॒श्वः ॥

The Pada Paath - transliteration

indraḥ | viśvaiḥ | vīryaiḥ | patyamānaḥ | ubhe iti | ā | paprau | rodasī iti | mahi-tvā | puram-daraḥ | vṛtra-hā | dhṛṣṇu-seṇaḥ | sam-gṛbhya | naḥ | ā | bhara | bhūri | paśvaḥ

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-054/mantra-rig-03-054-016

MANTRA NUMBER:

Mantra 16 of Sukta 54 of Mandal 3 of Rig Veda
Mantra 1 of Varga 27 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 16 of Anuvaak 5 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रजापतिर्वैश्वामित्रो वाच्यो वा

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

नास॑त्या मे पि॒तरा॑ बन्धु॒पृच्छा॑ सजा॒त्यं॑म॒श्विनो॒श्चारु॒ नाम॑ । यु॒वं हि स्थो र॑यि॒दौ नो॑ रयी॒णां दा॒त्रं र॑क्षेथे॒ अक॑वै॒रद॑ब्धा ॥

The Mantra without meters (Sanskrit)

नासत्या मे पितरा बन्धुपृच्छा सजात्यमश्विनोश्चारु नाम । युवं हि स्थो रयिदौ नो रयीणां दात्रं रक्षेथे अकवैरदब्धा ॥

The Mantra's transliteration in English

nāsatyā me pitarā bandhupṛcchā sajātyam aśvinoś cāru nāma | yuvaṁ hi stho rayidau no rayīṇāṁ dātraṁ rakṣethe akavair adabdhā ||

The Pada Paath (Sanskrit)

नास॑त्या । मे॒ । पि॒तरा॑ । ब॒न्धु॒ऽपृच्छा॑ । स॒ऽजा॒त्य॑म् । अ॒श्विनोः॑ । चारु॑ । नाम॑ । यु॒वम् । हि । स्थः । र॒यि॒ऽदौ । नः॒ । र॒यी॒णाम् । दा॒त्रम् । र॒क्षे॒थे॒ इति॑ । अक॑वैः । अद॑ब्धा ॥

The Pada Paath - transliteration

nāsatyā | me | pitarā | bandhu-pṛcchā | sa-jātyam | aśvinoḥ | cāru | nāma | yuvam | h i | sthaḥ | rayi-dau | naḥ | rayīṇām | dātram | rakṣetheiti | akavaiḥ | adabdhā

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-054/mantra-rig-03-054-017

MANTRA NUMBER:

Mantra 17 of Sukta 54 of Mandal 3 of Rig Veda
Mantra 2 of Varga 27 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 17 of Anuvaak 5 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रजापतिर्वैश्वामित्रो वाच्यो वा

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- भुरिक्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

म॒हत्तद्व॑: कव॒यश्चारु॒ नाम॒ यद्ध॑ देवा॒ भव॑थ॒ विश्व॒ इन्द्रे॑ । सख॑ ऋ॒भुभि॑: पुरुहूत प्रि॒येभि॑रि॒मां धियं॑ सा॒तये॑ तक्षता नः ॥

The Mantra without meters (Sanskrit)

महत्तद्वः कवयश्चारु नाम यद्ध देवा भवथ विश्व इन्द्रे । सख ऋभुभिः पुरुहूत प्रियेभिरिमां धियं सातये तक्षता नः ॥

The Mantra's transliteration in English

mahat tad vaḥ kavayaś cāru nāma yad dha devā bhavatha viśva indre | sakha ṛbhubhiḥ puruhūta priyebhir imāṁ dhiyaṁ sātaye takṣatā naḥ ||

The Pada Paath (Sanskrit)

म॒हत् । तत् । व॒: । क॒व॒य॒: । चारु॑ । नाम॑ । यत् । ह॒ । दे॒वा॒: । भव॑थ । विश्वे॑ । इन्द्रे॑ । सखा॑: । ऋ॒भु॒ऽभि॑: । पु॒रु॒ऽहू॒त॒ । प्रि॒येभि॑: । इ॒माम् । धिय॑म् । सा॒तये॑ । त॒क्ष॒त॒ । न॒: ॥

The Pada Paath - transliteration

mahat | tat | vaḥ | kavayaḥ | cāru | nāma | yat | ha | devāḥ | bhavatha | viśve | indre | sakhāḥ | ṛbhu-bhiḥ | puru-hūta | priyebhiḥ | imām | dhiyam | sātaye | takṣata | naḥ

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-054/mantra-rig-03-054-018

MANTRA NUMBER:

Mantra 18 of Sukta 54 of Mandal 3 of Rig Veda
Mantra 3 of Varga 27 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 18 of Anuvaak 5 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रजापतिर्वैश्वामित्रो वाच्यो वा

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒र्य॒मा णो॒ अदि॑तिर्य॒ज्ञिया॒सोऽद॑ब्धानि॒ वरु॑णस्य व्र॒तानि॑ । यु॒योत॑ नो अनप॒त्यानि॒ गन्तोः॑ प्र॒जावा॑न्नः पशु॒माँ अ॑स्तु गा॒तुः ॥

The Mantra without meters (Sanskrit)

अर्यमा णो अदितिर्यज्ञियासोऽदब्धानि वरुणस्य व्रतानि । युयोत नो अनपत्यानि गन्तोः प्रजावान्नः पशुमाँ अस्तु गातुः ॥

The Mantra's transliteration in English

aryamā ṇo aditir yajñiyāso 'dabdhāni varuṇasya vratāni | yuyota no anapatyāni gantoḥ prajāvān naḥ paśumām̐ astu gātuḥ ||

The Pada Paath (Sanskrit)

अ॒र्य॒मा । नः॒ । अदि॑तिः । य॒ज्ञिया॑सः । अद॑ब्धानि । वरु॑णस्य । व्र॒तानि॑ । यु॒योत॑ । नः॒ । अ॒न॒प॒त्यानि॑ । गन्तोः॑ । प्र॒जाऽवा॑न् । नः॒ । प॒शु॒ऽमान् । अ॒स्तु॒ । गा॒तुः ॥

The Pada Paath - transliteration

aryamā | ṇaḥ | aditiḥ | yajñiyāsaḥ | adabdhāni | varuṇasya | vratāni | yuyota | naḥ | anapatyāni | gantoḥ | prajāvān | naḥ | paśu-mān | astu | gātuḥ

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-054/mantra-rig-03-054-019

MANTRA NUMBER:

Mantra 19 of Sukta 54 of Mandal 3 of Rig Veda
Mantra 4 of Varga 27 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 19 of Anuvaak 5 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रजापतिर्वैश्वामित्रो वाच्यो वा

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

देवानां दूतः पुरुध प्रसूतोऽनागान्नो वोचतु सर्वताता । शृणोतु नः पृथिवी द्यौरुतापः सूर्यो नक्षत्रैरुर्व१न्तरिक्षम् ॥

The Mantra without meters (Sanskrit)

देवानां दूतः पुरुध प्रसूतोऽनागान्नो वोचतु सर्वताता । शृणोतु नः पृथिवी द्यौरुतापः सूर्यो नक्षत्रैरुर्वन्तरिक्षम् ॥

The Mantra's transliteration in English

devānāṁ dūtaḥ purudha prasūto 'nāgān no vocatu sarvatātā | śṛṇotu naḥ pṛthivī dyaur utāpaḥ sūryo nakṣatrair urv antarikṣam ||

The Pada Paath (Sanskrit)

देवानाम् । दूतः । पुरुध । प्रऽसूतः । अनागान् । नः । वोचतु । सर्वऽताता । शृणोतु । नः । पृथिवी । द्यौः । उत । आपः । सूर्यः । नक्षत्रैः । उरु । अन्तरिक्षम् ॥

The Pada Paath - transliteration

devānām | dūtaḥ | purudha | pra-sūtaḥ | anāgān | naḥ | vocatu | sarva-tātā | śṛṇotu | naḥ | pṛthivī | dyauḥ | uta | āpaḥ | sūryaḥ | nakṣatraiḥ | uru | antarikṣam

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-054/mantra-rig-03-054-020

MANTRA NUMBER:

Mantra 20 of Sukta 54 of Mandal 3 of Rig Veda
Mantra 5 of Varga 27 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 20 of Anuvaak 5 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रजापतिर्वैश्वामित्रो वाच्यो वा

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

शृ॒ण्वन्तु॑ नो॒ वृष॑णः॒ पर्व॑तासो ध्रु॒वक्षे॑मास॒ इळ॑या॒ मद॑न्तः । आ॒दि॒त्यैर्नो॒ अदि॑तिः शृणोतु॒ यच्छ॑न्तु नो म॒रुतः॒ शर्म॑ भ॒द्रम् ॥

The Mantra without meters (Sanskrit)

शृण्वन्तु नो वृषणः पर्वतासो ध्रुवक्षेमास इळया मदन्तः । आदित्यैर्नो अदितिः शृणोतु यच्छन्तु नो मरुतः शर्म भद्रम् ॥

The Mantra's transliteration in English

śṛṇvantu no vṛṣaṇaḥ parvatāso dhruvakṣemāsa iḻayā madantaḥ | ādityair no aditiḥ śṛṇotu yacchantu no marutaḥ śarma bhadram ||

The Pada Paath (Sanskrit)

शृ॒ण्वन्तु॑ । नः॒ । वृष॑णः । पर्व॑तासः । ध्रु॒वऽक्षे॑मासः । इळ॑या । मद॑न्तः । आ॒दि॒त्यैः । नः॒ । अदि॑तिः । शृ॒णो॒तु॒ । यच्छ॑न्तु । नः॒ । म॒रुतः॑ । शर्म॑ । भ॒द्रम् ॥

The Pada Paath - transliteration

śṛṇvantu | naḥ | vṛṣaṇaḥ | parvatāsaḥ | dhruva-kṣemāsaḥ | iḷayā | madantaḥ | ādityaiḥ | naḥ | aditiḥ | śṛṇotu | yacchantu | naḥ | marutaḥ | śarma | bhadram

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-054/mantra-rig-03-054-021

MANTRA NUMBER:

Mantra 21 of Sukta 54 of Mandal 3 of Rig Veda
Mantra 6 of Varga 27 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 21 of Anuvaak 5 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रजापतिर्वैश्वामित्रो वाच्यो वा

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

सदा॑ सु॒गः पि॑तु॒माँ अ॑स्तु॒ पन्था॒ मध्वा॑ देवा॒ ओष॑धीः॒ सं पि॑पृक्त । भगो॑ मे अग्ने स॒ख्ये न मृ॑ध्या॒ उद्रा॒यो अ॑श्या॒ं सद॑नं पु॒रु॒क्षोः ॥

The Mantra without meters (Sanskrit)

सदा सुगः पितुमाँ अस्तु पन्था मध्वा देवा ओषधीः सं पिपृक्त । भगो मे अग्ने सख्ये न मृध्या उद्रायो अश्यां सदनं पुरुक्षोः ॥

The Mantra's transliteration in English

sadā sugaḥ pitumām̐ astu panthā madhvā devā oṣadhīḥ sam pipṛkta | bhago me agne sakhye na mṛdhyā ud rāyo aśyāṁ sadanam purukṣoḥ ||

The Pada Paath (Sanskrit)

सदा॑ । सु॒ऽगः । पि॒तु॒ऽमान् । अ॒स्तु॒ । पन्था॑ । मध्वा॑ । दे॒वाः॒ । ओष॑धीः । सम् । पि॒पृ॒क्त॒ । भगः॑ । मे॒ । अ॒ग्ने॒ । स॒ख्ये । न । मृ॒ध्याः॑ । उत् । रा॒यः । अ॒श्या॒म् । सद॑नम् । पु॒रु॒ऽक्षोः ॥

The Pada Paath - transliteration

sadā | su-gaḥ | pitu-mān | astu | panthā | madhvā | devāḥ | oṣadhīḥ | sam | pipṛkta | bhagaḥ | me | agne | sakhye | na | mṛdhyāḥ | ut | rāyaḥ | aśyām | sadanam | puru-kṣoḥ

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-054/mantra-rig-03-054-022

MANTRA NUMBER:

Mantra 22 of Sukta 54 of Mandal 3 of Rig Veda
Mantra 7 of Varga 27 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 22 of Anuvaak 5 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रजापतिर्वैश्वामित्रो वाच्यो वा

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

स्वदस्व हव्या समिषो दिदीह्यस्मद्र्य१क्सं मिमीहि श्रवांसि । विश्वाँ अग्ने पृत्सु ताञ्जेषि शत्रूनहा विश्वा सुमना दीदिही नः ॥

The Mantra without meters (Sanskrit)

स्वदस्व हव्या समिषो दिदीह्यस्मद्र्यक्सं मिमीहि श्रवांसि । विश्वाँ अग्ने पृत्सु ताञ्जेषि शत्रूनहा विश्वा सुमना दीदिही नः ॥

The Mantra's transliteration in English

svadasva havyā sam iṣo didīhy asmadryak sam mimīhi śravāṁsi | viśvām̐ agne pṛtsu tāñ jeṣi śatrūn ahā viśvā sumanā dīdihī naḥ ||

The Pada Paath (Sanskrit)

स्वदस्व । हव्या । सम् । इषः । दिदीहि । अस्मद्र्यक् । सम् । मिमीहि । श्रवांसि । विश्वान् । अग्ने । पृत्ऽसु । तान् । जेषि । शत्रून् । अहा । विश्वा । सुऽमनाः । दीदिहि । नः ॥

The Pada Paath - transliteration

svadasva | havyā | sam | iṣaḥ | didīhi | asmadryak | sam | mimīhi | śravāṃsi | viśvān | agne | pṛt-su | tān | jeṣi | śatrūn | ahā | viśvā | su-manāḥ | dīdihi | naḥ

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-055/mantra-rig-03-055-001

MANTRA NUMBER:

Mantra 1 of Sukta 55 of Mandal 3 of Rig Veda
Mantra 1 of Varga 28 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 23 of Anuvaak 5 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रजापतिर्वैश्वामित्रो वाच्यो वा

देवता (Devataa) :- विश्वेदेवा, उषा

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

उ॒षसः॒ पूर्वा॒ अध॒ यद्व्यू॒षुर्म॒हद्वि ज॑ज्ञे अ॒क्षरं॑ प॒दे गोः । व्र॒ता दे॒वाना॒मुप॒ नु प्र॒भूष॑न्म॒हद्दे॒वाना॑मसु॒रत्वमेक॑म् ॥

The Mantra without meters (Sanskrit)

उषसः पूर्वा अध यद्व्यूषुर्महद्वि जज्ञे अक्षरं पदे गोः । व्रता देवानामुप नु प्रभूषन्महद्देवानामसुरत्वमेकम् ॥

The Mantra's transliteration in English

uṣasaḥ pūrvā adha yad vyūṣur mahad vi jajñe akṣaram pade goḥ | vratā devānām upa nu prabhūṣan mahad devānām asuratvam ekam ||

The Pada Paath (Sanskrit)

उ॒षसः॑ । पूर्वाः॑ । अध॑ । यत् । वि॒ऽऊ॒षुः । म॒हत् । वि । ज॒ज्ञे॒ । अ॒क्षर॑म् । प॒दे । गोः । व्र॒ता । दे॒वाना॑म् । उप॑ । नु॒ । प्र॒ऽभूष॑न् । म॒हत् । दे॒वाना॑म् । अ॒सु॒र॒ऽत्वम् । एक॑म् ॥

The Pada Paath - transliteration

uṣasaḥ | pūrvāḥ | adha | yat | vi-ūṣuḥ | mahat | vi | jajñe | akṣaram | pade | goḥ | vratā | devānām | upa | nu | pra-bhūṣan | mahat | devānām | asura-tvam | ekam

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-055/mantra-rig-03-055-002

MANTRA NUMBER:

Mantra 2 of Sukta 55 of Mandal 3 of Rig Veda
Mantra 2 of Varga 28 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 24 of Anuvaak 5 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रजापतिर्वैश्वामित्रो वाच्यो वा

देवता (Devataa) :- विश्वेदेवा, अग्निः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

मो षू णो॒ अत्र॑ जुहुरन्त दे॒वा मा पूर्वे॑ अग्ने पि॒तरः॑ पद॒ज्ञाः । पु॒रा॒ण्योः सद्म॑नोः के॒तु॒रन्त॒र्म॒हद्दे॒वाना॑मसु॒र॒त्वमेक॑म् ॥

The Mantra without meters (Sanskrit)

मो षू णो अत्र जुहुरन्त देवा मा पूर्वे अग्ने पितरः पदज्ञाः । पुराण्योः सद्मनोः केतुरन्तर्महद्देवानामसुरत्वमेकम् ॥

The Mantra's transliteration in English

mo ṣū ṇo atra juhuranta devā mā pūrve agne pitaraḥ padajñāḥ | purāṇyoḥ sadmanoḥ ketur antar mahad devānām asuratvam ekam ||

The Pada Paath (Sanskrit)

मो इति॑ । सु । नः॒ । अत्र॑ । जु॒हु॒र॒न्त॒ । दे॒वाः । मा । पूर्वे॑ । अ॒ग्ने॒ । पि॒तरः॑ । प॒द॒ऽज्ञाः । पु॒रा॒ण्योः । सद्म॑नोः । के॒तुः । अ॒न्तः । म॒हत् । दे॒वाना॑म् । अ॒सु॒र॒ऽत्वम् । एक॑म् ॥

The Pada Paath - transliteration

mo iti | su | naḥ | atra | juhuranta | devāḥ | mā | pūrve | agne | pitaraḥ | pada-jñāḥ | purāṇyoḥ | sadmanoḥ | ketuḥ | antaḥ | mahat | devānām | asura-tvam | ekam

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-055/mantra-rig-03-055-003

MANTRA NUMBER:

Mantra 3 of Sukta 55 of Mandal 3 of Rig Veda
Mantra 3 of Varga 28 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 25 of Anuvaak 5 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रजापतिर्वैश्वामित्रो वाच्यो वा

देवता (Devataa) :- विश्वेदेवा, अग्निः

छन्द: (Chhand) :- भुरिक्पङ्क्ति

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

वि मे पुरुत्रा पतयन्ति कामाः शम्यच्छा दीद्ये पूर्व्याणि । समिद्धे अग्नावृतमिद्वदेम महद्देवानामसुरत्वमेकम् ॥

The Mantra without meters (Sanskrit)

वि मे पुरुत्रा पतयन्ति कामाः शम्यच्छा दीद्ये पूर्व्याणि । समिद्धे अग्नावृतमिद्वदेम महद्देवानामसुरत्वमेकम् ॥

The Mantra's transliteration in English

vi me purutrā patayanti kāmāḥ śamy acchā dīdye pūrvyāṇi | samiddhe agnāv ṛtam id vadema mahad devānām asuratvam ekam ||

The Pada Paath (Sanskrit)

वि । मे । पुरुऽत्रा । पतयन्ति । कामाः । शमि । अच्छ । दीद्ये । पूर्व्याणि । सम्ऽइद्धे । अग्नौ । ऋतम् । इत् । वदेम । महत् । देवानाम् । असुरऽत्वम् । एकम् ॥

The Pada Paath - transliteration

vi | me | puru-trā | patayanti | kāmāḥ | śami | accha | dīdye | pūrvyāṇi | sam-iddhe | agnau | ṛtam | it | vadema | mahat | devānām | asura-tvam | ekam

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-055/mantra-rig-03-055-004

MANTRA NUMBER:

Mantra 4 of Sukta 55 of Mandal 3 of Rig Veda
Mantra 4 of Varga 28 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 26 of Anuvaak 5 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रजापतिर्वैश्वामित्रो वाच्यो वा

देवता (Devataa) :- विश्वेदेवा, अग्निः

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

स॒मा॒नो राजा॒ विभृ॑तः पुरु॒त्रा शये॑ श॒यासु॒ प्रयु॑तो॒ वनानु॑ । अ॒न्या व॒त्सं भर॑ति॒ क्षेति॑ मा॒ता म॒हद्दे॒वाना॑मसु॒र॒त्वमेक॑म् ॥

The Mantra without meters (Sanskrit)

समानो राजा विभृतः पुरुत्रा शये शयासु प्रयुतो वनानु । अन्या वत्सं भरति क्षेति माता महद्देवानामसुरत्वमेकम् ॥

The Mantra's transliteration in English

samāno rājā vibhṛtaḥ purutrā śaye śayāsu prayuto vanānu | anyā vatsam bharati kṣeti mātā mahad devānām asuratvam ekam ||

The Pada Paath (Sanskrit)

स॒मा॒नः । राजा॑ । विऽभृ॑तः । पु॒रु॒ऽत्रा । शये॑ । श॒यासु॑ । प्रऽयु॑तः । वना॑ । अनु॑ । अ॒न्या । व॒त्सम् । भर॑ति । क्षेति॑ । मा॒ता । म॒हत् । दे॒वाना॑म् । अ॒सु॒र॒ऽत्वम् । एक॑म् ॥

The Pada Paath - transliteration

samānaḥ | rājā | vi-bhṛtaḥ | puru-trā | śaye | śayāsu | pra-yutaḥ | vanā | anu | anyā | vatsam | bharati | kṣeti | mātā | mahat | devānām | asura-tvam | ekam

Link: www.vedakosh.com/rig-veda/mandal-3/sukta-055/mantra-rig-03-055-005

MANTRA NUMBER:

Mantra 5 of Sukta 55 of Mandal 3 of Rig Veda
Mantra 5 of Varga 28 of Adhyaya 3 of Ashtak 3 of Rig Veda
Mantra 27 of Anuvaak 5 of Mandal 3 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रजापतिर्वैश्वामित्रो वाच्यो वा

देवता (Devataa) :- विश्वेदेवा, अग्निः

छन्द: (Chhand) :- स्वराट्पङ्क्ति

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

आक्षित्पूर्वास्वपरा अनूरुत्सद्यो जातासु तरुणीष्वन्तः । अन्तर्वतीः सुवते अप्रवीता महद्देवानामसुरत्वमेकम् ॥

The Mantra without meters (Sanskrit)

आक्षित्पूर्वास्वपरा अनूरुत्सद्यो जातासु तरुणीष्वन्तः । अन्तर्वतीः सुवते अप्रवीता महद्देवानामसुरत्वमेकम् ॥

The Mantra's transliteration in English

ākṣit pūrvāsv aparā anūrut sadyo jātāsu taruṇīṣv antaḥ | antarvatīḥ suvate apravītā mahad devānām asuratvam ekam ||

The Pada Paath (Sanskrit)

आऽक्षित् । पूर्वासु । अपराः । अनूरुत् । सद्यः । जातासु । तरुणीषु । अन्तरिति । अन्तःऽवतीः । सुवते । अप्रवीताः । महत् । देवानाम् । असुरऽत्वम् । एकम् ॥

The Pada Paath - transliteration

